ग्रन्थाङ्कः-४४

पञ्जिका-परिकरितः

# ल-क्ष-ण-वि-ला-सः

श्री जैनसाहित्यवर्धक सभा

श्री-वृद्धि-नेमि-अमृत-ग्रन्थमाला-ग्रन्थाङ्क-४४

# लक्षण-विलासः

## ( पञ्जिकापरिकरितः )

— कर्ता —

शासनसम्राट्-तीर्थोद्धारक-सर्वतन्त्र-स्वतन्त्र-जगद्गुरु-पूज्यपादाचार्यमहाराजाधिराज श्री विजयनेमिसूरीश्वरमहाराजपट्टालङ्कार-शास्त्रविशारद-कविरत्न-पीयूषपाणि-पूज्यपादाचार्यमहाराज-श्रीविजयामृतसूरीश्वरमहाराज-विनेयरत्न-विनयनिधान-वयोवृद्ध-पूज्यपाद-पन्न्यासप्रवरश्रीपुण्यविजयजिद्गणिवर्यमहाराजशिष्य-पन्न्यास धुरन्धरविजयगणी ।

प्रकाशक—
श्री जैनसाहित्यवर्धक सभा
शेठ सुरेन्द्रभाई साराभाई
अहम्मदावाद

विक्रमसंवत्
२०१७

प्राप्तिस्थान—
श्री अमृतसूरीश्वरजी जैन ज्ञान मन्दिर
दौलतनगर, बोरीवली ( पूर्व )
मुंबई—६६

मूल्यम् २ रु०

मुद्रक—
पं० परमेष्ठीदास जैन न्यायतीर्थ
जैनेन्द्र प्रेस, ललितपुर
( जिला-झांसी ) उ.प्र.

# નિવેદન

આ '**લક્ષવિલાસ**' ગ્રન્થ વ્યાકરણુ અને સાહિત્ય–વિષયક છે એ સ્પષ્ટ સમજાય એવું છે, છતાં તેમાં જે મજા છે તે જુદી જ છે. ઉત્સુકતા જન્માવીને–તેમાં જકડી રાખવાનું કાર્ય ઉખાણુા, કોયડા, કૂટ પ્રશ્નોની જેમ આ ગ્રંથ કરે છે. આ ગ્રન્થમાં શ્રી સિદ્ધહેમચન્દ્રશબ્દાનુશાસનના કેટલાક સૂત્રોને અનુલક્ષીને ગુપ્તસૂત્રતા ગુંથી છે,–ને તે ગુંથણીમાં નીચે પ્રમાણે તેવીસ રીતો અજમાવી છે.

(૧) ૨, ૩, ૫, ૬, ૮, ૧૦, ૧૨, ૧૩, ૧૭, ૧૯, ૨૦, ૨૨, ૨૩, ૨૪, ૨૫, ૨૬, ૩૦, ૩૪, ૩૫, ૩૬, ૩૮, ૪૦, ૪૬, ૪૯, ૫૪, ૫૫, ૫૬, ૮૨, ૯૫, ૯૯, ને ૧૦૩, એ પ્રમાણેના ક્રમાંકેવાળા શ્લોકોમાં જુદા જુદા પ્રશ્નો પૂછવામાં આવ્યા છે. તેનાં ઉત્તર રૂપે એવા શબ્દો મેળવવાના રહે છે કે જે શબ્દો હૈમસૂત્રમાં યોજાએલા હોય, અને એ રીતે હૈમવ્યાકરણનું સૂત્ર સ્મરણમાં લાવવું અનિવાર્ય ગણાય.

(૨) ૪, ૭૯ અને ૯૬ એ ત્રણુ શ્લોકમાં હૈમસૂત્રમાં આવતા અક્ષરોમાં પોતાના તરફથી—અર્થાત્ શ્લોકમાં જણાવ્યા પ્રમાણેના અક્ષરો ઉમેરીને જે તૈયાર થાય તેનાં શબ્દાર્થનું સ્વરૂપ જણાવીને રચના કરી છે.

(૩) ૭, ૧૧, ૧૮, ૨૧, ૨૮, ૩૭, ૪૩, ૪૫, ૪૭, ૭૫, ૭૮, ૮૦, ને ૮૪,–એ અંકવાળા શ્લોકોમાં સૂત્રની ગુંથણી અક્ષરશઃ આવી જાય છે. પણ–તેમાંથી સૂત્ર તારવા માટે સૂત્ર સ્મરણમાં હોવું જરૂરી છે એટલું નહિ પણ શ્લોકનો અર્થ વ્યવસ્થિત બેસારવો

પણ જરૂરી છે. એ રીતે જે રસાસ્વાદ જાગશે તે કોઈ વિલક્ષણ જણાશે.

(૪) ૧૪, ૧૫, ૨૭, ૩૯, ૪૨, ૫૬, ૬૭, ૮૮, ૯૦, ૯૪ ને ૧૦૧ એ પ્રમાણેના અંક વાળા શ્લોકોમાં સૂત્ર જણાવી દીધું તો છે જ પણ ત્રીજી રીત પ્રમાણે સ્પષ્ટ અક્ષરોમાં નહિ, કાંઇક મહેનત કરીને સૂત્ર તારવવું પડે. શ્લોકનો અર્થ તો જુદા પ્રકારે નીકળતો હોય એ સ્વાભાવિક છે.

(૫) ૯, ૭૪ અને ૯૮ એ ત્રણ શ્લોકોમાં સૂત્રના અક્ષરો છૂટા પાડીને તે દરેક અક્ષર વિલક્ષણ રીતે જણાવવામાં આવ્યો છે. તે અક્ષરો એકઠા કરવામાં આવે તો તેમાં પૂછેલું સૂત્ર સ્પષ્ટ પ્રાપ્ત થાય છે.

(૬ સોળમાં શ્લોકમાં સૂત્રને બે વિભાગમાં વહેંચી નાંખીને જે બે પદો પ્રાપ્ત થયા છે, તેના પર્યાયવાચક શબ્દો જણાવીને જે રૂપ ઇષ્ટ હોય છે તે જણાવ્યું છે અને તે રીતે સૂત્ર સમજાવ્યું છે.

(૭) ૨૯, ૫૨, ૫૩, ૭૦, ૮૩, ૮૯ અને ૧૦૦ એ અંકના શ્લોકોનાં કોઈ પદવિશેષ કે વાક્યવિશેષ જણાવીને–તેમાંથી સૂત્રને ઉપયોગી વર્ણો તારવી લેવા માટે વધારાના વર્ણો દૂર કરવાનું સમજાવ્યું છે.

(૮) ૫૭ અને ૧૦૨ અંકના શ્લોકોનાં ઉપર જણાવ્યા પ્રમાણેની રીતે કરવાનું છે, પણ તેમાં વિશેષતા એટલી છે કે ૫૭માં શ્લોકમાં એક અક્ષર દૂર કરીને એક અક્ષર ઉમેરવાનો પણ છે અને ૧૦૨ મા શ્લોકમાં એક વાક્યમાંથી બે અક્ષરો જ લેવાનાં છે.

(૯) ૩૧ માં શ્લોકમાં સૂત્રને વિલક્ષણ રીતે છૂટું પાડીને તેનાં પર્યાય શબ્દો જણાવીને તેની વિભક્તિ સમજાવી છે, ને તે રીતે સૂત્ર ઉપસ્થિત કર્યું છે.

(૧૦) ૩૨ અને ૯૧ માં શ્લોકમાં સૂત્રનું જે પ્રયોજન છે તે જણાવીને સૂત્ર સમજાવ્યું છે.

(૧૧) ૬૮ માં શ્લોકમાં સૂત્રનો અર્થ તેના પર્યાય શબ્દો દ્વારા શણાવીને સૂત્ર મેળવવા જણાવ્યું છે.

(૧૨) ૩૩ માં શ્લોકમાં સૂત્ર પ્રાપ્ત કરવા માટે એક એવો શબ્દ જણાવ્યો છે કે જેનો શ્લોકમાં સમજાવ્યા પ્રમાણે સંસ્કાર કરવાથી સૂત્ર મળી આવે છે.

(૧૩) ૪૧, ૬૧, ૬૨, ૬૪, ૬૫ અને ૭૩ એ શ્લોકોમાં સૂત્ર મેળવવા માટે એવી રીતિ અજમાવી છે કે–સૂત્રના અક્ષરો અને પદો શ્લોકમાં કહ્યા પ્રમાણે મેળવવા. જો એ બરાબર મળી જાય તો સૂત્ર છૂપું ન રહે.

(૧૪) ૮૫ માં શ્લોકમાં સૂત્રને એવી વિલક્ષણ રીતે ત્રણ પ્રકારે જણાવી દીધું છે કે—થોડું વ્યવસ્થિત ધ્યાન આપવામાં આવે તો સૂત્ર દીવા જેવું સ્પષ્ટ જણાય અને વાચકને સુંદરઆહ્લાદ આવે.

(૧૫) ૯૩ માં શ્લોકમાં સૂત્રને એવું તો રમાડયું છે કે સૂત્રને શોધવા માટે વધુ શ્રમ લેવા જાય તો શોધક એવો ગુંચવાઈ જાય કે લાંબા કાળ સુધી સૂત્ર સામે જ હોવા છતાં સમજી શકે નહિ. એટલું ખરું કે વિશેષ શ્રમ લીધા પછી સૂત્ર મળે ત્યારે મજા પણ વિશેષ આવે.

(૧૬) ૪૮ મા શ્લોકમાં સૂત્રથી જે જે પ્રયોગો–નિષ્પન્ન થાય છે તે બધા જણાવી દીધા છે અને શ્લોકનો અર્થ હૃદયંગમ નીકળે છે તે તો જુદો જ.

(૧૭) ૫૦, ૫૧, ૬૩, ૬૯ અને ૮૧-એ પાંચ શ્લોકોમાં સૂત્રમાંથી જુદા જુદા શબ્દો તારવીને તેનો અર્થ જણાવ્યો છે. આ રીત શબ્દોની રમૂજ રૂપે ખૂબ જ પ્રચલિત છે, એક ત્રણ અક્ષરનું કે પાંચ અક્ષરનું નામ છે. તેના પેલા બે અક્ષરો હોવાથી આમ થાય છે ને પેલો છેલ્લો અક્ષર મેળવવાથી આમ થાય છે—એ પ્રમાણે બાળકો વગેરે પૂછે છે અને પછી શોધવા માટે સારી જહેમત ઉઠાવે છે. હાસ્યરસ નિષ્પન્ન કરવામાં સારી હથોટી ધરાવતા શ્રી જ્યોતીન્દ્ર દવેએ 'બુદ્ધિની કસોટી' નામે એક લેખમાં આ પ્રકારને સુંદર રમાડયો છે.

સંસ્કૃત સાહિત્યમાં આ પ્રકારનો એક જિનસ્તુતિનો શ્લોક સરસ આકર્ષણ જન્માવે છે. તે આ પ્રમાણે છે.—

**आद्येन हीनं जलधावदृष्टं, मध्येन हीनं भुवि वर्णनीयम् ।**
**अन्त्येन हीनं धुनुते शरीरं, तन्नामकं तीर्थपतिं नमामि ॥१॥**

વર્તમાન ચોવીશીના એક જિનવરનું એવું ત્રણ અક્ષરનું નામ છે કે જેનો પ્રથમ અક્ષર દૂર કરવાથી જે શબ્દ આવે તેનો અર્થ સમુદ્રમાં રહેલી અને નજરે ન દેખાતી વસ્તુ થાય, વચલો અક્ષર કાઢી નાંખવાથી જે થાય તે વિશ્વમાં પ્રશંસનીય છે અને છેલ્લો વર્ણ દૂર કરવાથી જે થાય છે તે શરીરને કંપાવનાર છે. તે જિનવરને હું નમન કરૂં છું. એ જિનવરનું નામ શોધવાથી આનંદ આવે એમ છે, માટે અહિં તે જણાવવાની ઉત્સુકતાનું સંવરણ કરવું ઉચિત છે.

(૧૮) ૫૮, ૭૬, ૭૭, ૮૬ અને ૮૭ એ પાંચ શ્લોકોમાં સત્તરમાં પ્રકારમાં જણાવ્યા પ્રમાણેની રીતનું અનુસરણ કરવામાં આવ્યું છે, પણ તેમાં અહિં થોડી વિલક્ષણતા કરીને સહજ કઠિનતા વધારી છે. એ તે તે શ્લોકો વિચારવાથી જણાય એવી છે.

(૧૯) ૫૯ મા શ્લોકમાં સૂત્રના બધા અક્ષરો જુદી રીતે જણાવ્યા છે. શ્લોકમાં એ અક્ષરો જે રીતે ગુંથ્યા છે તે રીત ક્લિષ્ટ છે એ સ્પષ્ટ છે. અક્ષરો મેળવ્યા પછી પણ તેમાંથી સૂત્ર ગોઠવવું એ પણ સહજ નથી. તેમાં થોડો શ્રમ લેવો પડે એમ છે.

(૨૦) ૬૦ મા શ્લોકમાં એક એવું સૂત્ર પસંદ કરવામાં આવ્યું છે કે જેનાં અનેક અર્થો થાય છે. તે અર્થો શ્લોકમાં જણાવ્યા છે. અનેકાર્થ શબ્દનો જેને પરિચય હોય તેને એ સૂત્ર મેળવવામાં વાર ન લાગે એ સહજ છે.

(૨૧) ૭૧ મા શ્લોકમાં સૂત્રના અક્ષરો એવા સુન્દર ક્રમશઃ ગુંથ્યા છે કે સૂત્ર સ્પષ્ટ જણાય છે. શ્લોકનો ભાવ પણ રોચક છે.

(૨૨) ૭૨ અને ૯૭ મા શ્લોકોમાં એવી રીત અનુસરવામાં આવી છે કે જેમાં સૂત્રના અક્ષરોમાં કાંઈક ઉમેરવામાં આવે તો અમુક રૂપ મળી આવે. એ રીતે સૂત્રની ઉપસ્થિતિ કરવામાં વ્યાકરણના શબ્દ તથા ધાતુના પ્રયોગો તરફ પણ લક્ષ્ય આપવું જરૂરી બને.

(૨૩) ૯૨ મા શ્લોકમાં જે પ્રક્રિયા જણાવી છે તે પ્રમાણે જે નિષ્પન્ન થાય તેને ઉલટવામાં આવે તો સૂત્ર મળે અથવા સૂત્રને ઉલટાવવાથી શ્લોકમાં જણાવેલ અર્થો ઉપસ્થિત થાય. આ વિલોમ રીતિ પણ એક વિલક્ષણ રસાનુભવ કરાવે છે.

*　　　*　　　*

આ ગ્રન્થનો ઉપર પ્રમાણે પરિચય રાખવાથી તેની ખૂબી સમજાશે એટલું જ નહિ પણ તે તે શ્લોકોનો ઉકેલ કરવામાં આ પરિચય ઉપયોગી બનશે.

આ ગ્રંથનો ટૂંક પરિચય અને પ્રસ્તાવના—અનુક્રમે શ્રી ભાનુ-ભાઈ વ્યાસે (બાદરાયણે) અને શ્રી રામપ્રસાદ પી. બક્ષીએ લખ્યાં છે. બન્ને સાહિત્યક્ષેત્રમાં ખ્યાતનામ વિદ્વાનો છે. તેમાં શ્રી ભાનુભાઈ વ્યાસનો પ્રાગજીભાઈ દ્વારા પરિચય થયા બાદ તેમને એવી આત્મી-યતા જન્માવી છે કે—આ ગ્રન્થ અંગે જ નહિ પણ ઈતર અનેક સાહિત્યાદિ પ્રવૃત્તિઓમાં તેઓ અવન્ધ્ય–રસ ધરાવતા રહ્યા છે. શ્રી રામપ્રસાદભાઈની શક્તિ અને વિશેષતા તેમની ચોકસાઈમાં સવિશેષ ઝળકે છે.

**‘वेश्यानामिव विद्यानां, मुखं कैः कैर्न चुम्बितम् ।**
**हृदयग्राहिणस्तेषां, द्वित्राः सन्ति वा न वा ॥१॥’**

એ સૂક્તમાં જણાવ્યા પ્રમાણે કહીએ તો તેઓ ‘દ્વિત્રાઃ સન્તિ’ માંના એક છે એમ કહેવામાં સહજ પણ અતિશયોક્તિ નથી એવી પ્રતીતિ તેમને જેઓ ઓળખે છે તેઓને થયા વગર રહેશે નહિં.

તેઓ બન્નેને ધર્મ–લાભનો વિશિષ્ટ આશીર્વાદ આપવો એમાં ઔચિત્યનું સર્વસ્વ છે.

પંડિતજી નરેન્દ્રચંદ્રઝા, દસથી પણ વધુ વર્ષોથી સહયોગ આપી રહ્યા છે એ પણ ઉલ્લેખનીય છે.

પૂજ્યપાદ ગુરુવર્યોની કૃપા વિના આ સર્વ અસંભવિત છે, એ હકીકત અનુભવીઓને સ્વાભાવિક સમજાય એવી છે. એમનાં

પ્રત્યેની કૃતજ્ઞતા સમર્પણ સર્વસ્વ પ્રકારે કરવાથી અંશે વ્યક્ત થાય છે-બાકી શબ્દમાં જણાવવાથી અર્થ સરતો નથી.

આ ગ્રન્થનું પરિશીલન કરનારા અને તેનો વિસ્તાર વધારનારા વિશ્વમાં વિદ્યમાન છે-તેમને તેમનાં કાર્ય અંગે વિજ્ઞપ્તિ કરવાની પણ આવશ્યક્તા નથી. તેમનો તો તે સ્વભાવ જ છે.

—લેખક

# —: પરિચય :—

આ નાના ગ્રન્થનો જે આમુખ મુ. શ્રી રામપ્રસાદ. પ્રે. બક્ષીએ લખ્યો છે તે પછી કશા પરિચયની અપેક્ષા રહેતી નથી. પરંતુ કેવળ ગુજરાતી ભાષાના વિશેષ અભિજ્ઞ હોય એવા વાચકો માટે આ પરિચય આવશ્યક માન્યો છે.

વાઙ્મયમાં કેટલાક સામાન્ય ગ્રન્થો હોય છે જેમાં સહુ વાંચનારને રસ પડે અને તે વાંચવા માટે કોઈ પૂર્વ અધિકારની અપેક્ષા પણ નથી હોતી. આ ગ્રન્થ આવા સામાન્ય પ્રકારનો નથી. આ ગ્રન્થના વાચકને વ્યાકરણ શાસ્ત્રમાં રસ હોય એ તો આવશ્યક છે જ. પણ તે ઉપરાંત આચાર્ય હેમચંદ્રસૂરિના શબ્દાનુશાસનનો પરિચય હોય એ પણ આવશ્યક છે. એવા પરિચય વગર પણ સંસ્કૃત ભાષાનું સારૂં જ્ઞાન હશે તો પ્રહેલિકાઓ તરીકે લક્ષણવિલાસના શ્લોકો રસપ્રદ નીવડશે.

પૂ. પં. ધુરંધરવિજયજીએ જૈનધર્મના આચાર્યો, સાધુઓ અને મુનિઓની વિદ્યોપાસનાની પરંપરા સજીવ રાખી છે. તેમાં પણ જે ઉત્સાહથી એમણે ધાર્મિક સાહિત્યની ઉપાસના કરી છે તેવા જ ઉત્સાહથી તેમણે ભાષા અને વ્યાકરણની ઉપાસના કરી છે. તે એમની વિદ્વત્તાની સર્વદેશીયતાની આપણને પ્રતીતિ કરાવે છે.

સંસ્કૃત ભાષામાં પ્રહેલિકાઓ મનોરંજન અને વિનોદ માટે રચાઈ છે, તે ઉપરાંત તેમાં કૂટતા મૂકીને કવિઓએ બુદ્ધિને ઉત્તેજવાનો પણ પ્રયાસ કર્યો છે. આવી રચનાઓમાં બુદ્ધિની ચમત્કૃતિને માટે ઘણો અવકાશ છે. એટલે આ બધા શ્લોકોને આપણે કાવ્યરચનાઓ કહીએ તો તે વિચારગર્ભકાવ્યો કહી શકાય. ઉર્મિના

સંચલનને કે સંવેદનાને આવી કૃતિઓમાં ભાગ્યે જ અવકાશ રહે છે.

વ્યાકરણશાસ્ત્રના અભ્યાસમાં રસ જાગૃત કરવો અને જાગૃત થયેલો રસ ટકાવી રાખવો એ બંને કાર્યો સાધારણ રીતે મુશ્કેલ છે પરંતુ જેમને આ દિશામાં સિદ્ધિ વરી હોય તેમને માટે આ કાર્યો હસ્તામલકવત્ બની જાય છે.

પૂ. ધુરંધર વિજયજીએ શબ્દાનુશાસન પર પદ્યબદ્ધ ટીકા લખી છે. એટલે વ્યાકરણમાં કાવ્યતત્ત્વનો યોગ કરવાનો કીમિયો એમને હાથ લાધી ગયો છે. અને લક્ષણવિલાસના શ્લોકોમાં તો એ કીમિયો વિશેષરૂપે આપણી દૃષ્ટિએ પડે છે.

કોઈકને એમ લાગે કે આ યુગમાં વ્યાકરણને આટલું બધું મહત્વ શા માટે? પરંતુ આ પ્રશ્ન જ નિરર્થક છે. કોઈપણ યુગને વ્યાકરણ વગર ચાલ્યું નથી. અને ભવિષ્યના કોઈ યુગને પણ વ્યાકરણ વગર નહીં ચાલે. વ્યાકરણની ઉપેક્ષા થતાં સાહિત્યની ઉપેક્ષા થશે અને સાહિત્યની ઉપેક્ષા થાય ત્યાં જીવનની દશા પણ દયાપાત્ર બની જાય છે એટલે આપણા વિદ્યાર્થીઓ અને અન્ય અભ્યાસીઓ ભાષા અને વ્યાકરણના અભ્યાસમાં વિશેષ રત થાય એ જરૂરનું છે. અને આ દિશામાં લક્ષણવિલાસ સહાયરૂપ બનશે. એ અવશ્ય.

મુ. રામભાઈ બક્ષીએ જે ઉત્સાહ અને ચીવટથી આ ગ્રન્થનો આમુખ લખી આપ્યો છે તે તો એમના સ્વભાવના લાક્ષણિક અંશો છે. પરંતુ આ કાર્ય તેમને સોંપવામાં હું નિમિત્ત બન્યો હતો એટલે તેમનો આભાર આ સ્થળે વ્યક્ત કરૂં તો તેઓ ક્ષમા કરશે એવી આશા છે. વળી એ આમુખ હેતુપૂર્વક અંગ્રેજીમાં લખવામાં આવ્યો છે કારણ કે ગુજરાતી ભાષાથી પરિચિત ન હોય એવા

સંસ્કૃત ભાષાના અભ્યાસીઓ પણ એ આમુખ વાંચીને લક્ષણ-વિલાસના અભ્યાસનો પ્રારંભ કરી શકે. તે પછી તેમની સહાયતા માટે પૂ. ધુરંધરવિજયજીએ લખેલી પંજિકા તો છે જ.

મારી તો ઇચ્છા ખરી કે કેવળ ગુજરાતના જ નહિ પણ ભારતીય વિદ્વાનો અને પાશ્ચાત્ય વિદ્વાનો પણ પૂ. ધુરંધરવિજયજીની આ પ્રવૃત્તિથી પરિચિત બને.

મારો આ મિતાશરી પરિચય આ ગ્રંથ સાથે જોડવાનું સદ્-ભાગ્ય મને મલ્યું તે માટે હું મને પોતાને ધન્ય માનું છું.

લિ.

**ભાનુશંકર બા. વ્યાસ.**

( बादरायण )

# INTRODUCTION.

India can well be proud of its philosophy, its science of poetics and aesthteics and its grammar, the science of language. Philosophy as propounded by the Vedantic and the Jain Schools, intuitive as it is, has arrived at such ultimate principles which seem to anticipate the latest scientific thought. In the field of poetics and aesthetics, the recent pronouncements on the fundamental nature of artistic creation seem to echo the tenets of our ancient science of poetics, when, for instance, Mrs. Susanne K. Langer arrived at the conclusion that what an artist creates is virtual emotive experience, Sanskrita scholars are reminded of their age-old theory of भाव which regards the function of art to be emotive. In the domain of linguistics, as a well-known modern linguist says,

> "So far as our knowledge goes, the science of linguistics was founded or put on its present basis by one Panini in India several centuries before Christ. Its earliest form anticipated its most recent one."

There were grammarians before Panini, but the latter's indisputable supremacy has resulted in his predecessors being consigned to oblivion. Amongst the few post-Paninian grammarians who attempted to present the system in a revised form aiming at simplicity, Hemachandra occupies the foremost place. His chief contribution to simplicity is the adoption by him of symbolic terminology which is more direct in its denotative reference than that used by Panini. To give a few instances, Hemachandra uses the self-explanatory terms स्वरः, व्यञ्जनम्, घोषः, अघोषः respectively instead of अच्, हल्, खर, हश् which are the symbols used by Panini.

A peculiar noteworthy feature of Indian grammatic literature, which is witout a parallel in other countries, is the composition of poems which, while they conform to the essential nature of poetry, serve at the same time to supply in each verse an apposite illustration of a grammatical sutra. Such is the Rama-Charitra, better known as Bhatti-Kavyam, written by the poet Bhatti to illustrate Panini's Sutras.

Acharya Hemachandra similarly composed two poems to provide apposite illustrations for the

Sutras of his grammar, the Sabdanusasanam : the Sanskrita Dvyasraya Kavya is written to illustrate the rules contained in the first seven Adhyayas of his grammar which deal with Sanskrita; the other, Prakrita Dvyasaraya Kavya ( Kumarpala Charitam ) performs a similar function with reference to his last Adhyaya which deals with Prakrita and other middle Indo-Aryan languages. This alliance of poetry and grammar, which is a unique feature of Sanskrita Literature, enlists poetic imagination into the service of the formal aspect of language. It brings the pleasure of poetry to aid and enliven the study of grammar. There exists, in Sanskrita Literature, examples of a different kind of alliance too, namely that alliance of poetry and grammar wherein grammatical categories and terms are exploited to aid poetic imagination, to embellish diction and even to suggest an emotion. For instance take this verse in which the neutre gender of the word मनस् ( mind has been turned to good account in suggesting the helpless state of a pining lover:-

नपुंसकमिति ज्ञात्वा, प्रियायै प्रेषितं मनः ।
तत् तु तत्रैव रमते, वयं पाणिनिना हताः ॥

Such use of grammatical categories is not

confined to stray verses. Every one of the Sanskrita Mahakavyas has levied such tribute from grammar, with greater or less poetic merit. Kalidasa has found in grammatical process an apt analogy for Rama's action of substituting Sugriva for Vali on the royal throne, and has given us a verse wherein this alliance of grammar and poetry definitely enhanaces the charm of the latter. Here is that verse :—

स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥

( रघुवंश, १२–५८ )

Bharavi has also attempted a similar poetic device in his Kiratarjuniyam. But, as the reader will note in the verse I quote here, Bharavi's effort, though ingenious, misses the simple charm that marks the verse of Kalidasa :—

स भवस्य भवक्षयैक हेतोः,
सितसप्तेश्च विधास्यतोः सहार्थम् ।
रिपुराप पराभवाय मध्यं,
प्रकृतिप्रत्यययोरिवानुबन्धः ॥

( किरातार्जुनीयम्, १३, १९ )

The same has to be said, indeed with a greater emphasis on the strained contrivance that dims

the charm, about the following verse of Sri Harsha the author of Naishadhiya Kavya :—

क्रियेत चेत् साधु विभक्ति चिन्ता, व्यक्तिस्तदा सा प्रथमाभिधेया ।
या स्वौजसां साधयितुं विलासैः, तावत् क्षमानामपदं बहुस्यात् ॥
( नैषधीयम् ३–२३ )

We must, however, give these poets what credit is due to them. Bharavi has at least endowed his verse with partial double entendre and evolved a Simile out of the grammatical terms used by him; Sri Harsha establishes no analogy between his theme and the grammatical process alluded to, but he too at any rate has a double entendre to offer in the terms विभक्तिः, व्यक्तिः, प्रथमा, स्वौजसाम्, though the phrase क्षमानामपदं is somewhat tortuous. Lower down in this category of alliance of poetry and grammar would come a verse of Magha ( Sisupalavadha 14-66 ) and several verses of Sri Harsha ( Naishadhiya 2-40, 17 118, 17-148, 20-54) because they therein have achieved little beyond a circumlocution wherein grammatical terms are employed to express the sense which usual Sanskrita vocabulary could have presented in a simple, straightforward manner.

The reader may recall here that well known verse in Bhoja prabandha wherein each line of a verse starts off with two words of a Sutra of

Panini's grammar. These words are used therein to connote not what they mean in the Sutra to which they belong, but something else which is relevant to the theme of the verse. I give that verse here :—

सर्वस्य द्वे सुमतिकुमती संपदापत्तिहेतू,
वृद्धो यूना सह परिचयात् त्यज्यते कामिनीभिः ।
एको गोत्रे प्रभवति पुमान् यः कुटुम्बं बिभर्ति,
स्त्रीपुंवच्च प्रभवति यदा तद्धि गोत्रं (गेहं) विनष्टम् ॥

These instances that we have noticed are entitled to their claim to poetic conception and to dexterity which arrays it in grammatical terminology.

There is another kind of verse, found in the literature of all countries, which demands greater ingenuity both on the part of the author and the reader, without any claim to genuine poetic conception. Such are puzzles or riddles, कूटश्लोकाः or प्रहेलिकाः. Occasionally, in Sanskrita Literature, one comes across a conundrum based on Sanskrita Grammar and meant to bring out, when solved, some व्याकरणसूत्र. Here is one such verse :—

धीरः कीदृग् वचो ब्रूते, को रोगी कश्च नास्तिकः ।
कीदृक्-चन्द्रं न पश्यन्ति, तत्सूत्रं पाणिनेर्वद ॥

This verse asks four questions to which the answers are, respectively : अर्थवद्, अधातुः, अप्रत्ययः,

and प्रातिपदिकम् ; and these when put together, give us the Sutra : अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

( पाणिनि १-२-४५ )

It will at once be seen that this riddle requires, in one who attempts to solve it, a two-fold mental equipment : an adequate knowledge of wordly affairs and a familiarity with grammatical Sutras. The author thereof also must have both wordly wisdom and mastery over grammar, to a much greater degree than the reader.

When we bear in mind this need of two-fold accomplishment in the author of such riddles, we can well understand why there is a paucity of such endeavours.

That paucity now becomes a thing of the past. Here is now before us this लक्षणविलासः, confronting us with a challenge to tackle over a hundred such Prahelikas. The moment you take up the gauntlet you find yourselves overwhelmed and deeply engrossed in a composite task, namely that of getting at the purport of the verse before you and also that of laying your finger on the right Sutra. Verse follows verse and drags you on and on until you have solved all the riddles, unless you are compelled by some other urgent matter to lay the self

imposed ordeal aside. No, in fact this is not an ordeal; it is a pursuit that grips you. The test is severe, but you enjoy it while it lasts, and you eagerly submit to it when the interruption is away. I confess that is what happened to me when this लक्षणविलासः was brought to me with a proposal that I should write an introduction to it. It was only when I had, late after midnight, solved all these riddles that I could grant myself a respite. It was indeed, as I felt it, a very cheap price to pay for the pleasure I had derived from the verses. A price ? No. I should rather regard it as a privilege.

This output of over a hundred arresting verses has been rendered possible by the rich tradition of ceaseless intellectual engagment which is a praiseworthy characteristic of the Jain religious or ascetic order. The author of the work before us, revered Pannyasji Sri Dhurandhara Vijaya Ganivarya is a highly erudite holy man. Now 42 years of age, he took the Diksha at the age of 14 years. It is remarkble that both he and his father Pujya Pannyasji Sri Punya Vijayji Ganivarya were together initiated to the holy Jain order, the दीक्षागुरु being Sastra-visarada Kavi Ratna Piyush-pani Acharya Sri Vijaya Amrita Suriswarji, who was the chief

disciple of Sasana Samrat Acharya Maharaj Sri Vijaya-Nemi Surisvaraji Maharaj. How well Pannyasaji Sri Dhurandhar Vijay Ganivarya has carried on, and contributed to the Jain holy tradition of high scholarship can to some extent be gauged by the very large number of books written by him, both in Sanskrita and in Gujarati. His work* comprise philosophical and religious treatises, Akhyanas in prose and verse, Poems, a Drama, Stotras, lives of holy men and women, grammatical treatises, commentaries, Sermons etc. These are in all 56, out of which about 40 are in Sanskrita

I had the opportunity of meeting the learned Muni Maharaj Sri on the occasion of the formal publication of the first part of his versified commentary सिद्धहेमचन्द्र-शब्दानुशासनम्. His mastery of grammar has now bloomed forth into this लक्षण विलास: which though composed with the main object of presenting to readers some Sutras of Hemachandracharya concealed in the sense or in the words of metrical stanzas, occasionally rises to the height of poetry, as in the following verses :—

यन्मूर्तिर्जनतामनोनयनहृत्, सल्लक्षणैर्लक्षिता,
यद्वाणी मधुरा सुधाधरकरी, स्पष्टा विशिष्टाक्षरा ।

---

* Vide the list appended elsewhere in the book.

यस्यास्ति प्रतिभा सदैव विशदा, सद्भावभावोद्भवा,
व्याख्याने न च तस्य किं तत यशो-ग्रन्थाद् भवेद् गौरवम् ॥९०॥

सरसिजमधुमाद्यन्मञ्जुगुञ्जद्विरेफे,
सरससरसिकूले, गन्धवाहानुकूले ।
'मधुपकुलनिनादो नादवृन्देवर'स्तद्—
युगपरमथ चान्स्यं कृष्यतामुच्यतां वा ॥१०२॥

The Sutras of Hemchandra so deftly hinted at by these verses are for verse 90 तस्य व्याख्याने च ग्रन्थात् ( ६-३-१४२ ) and for verse 102 परः ( ७-४-११८ )

Like the anonymous verse of धीरः कीदृक्, etc. given above, the following verge of लक्षणविलास contains a number of questions, which if answered correctly bring out the particular Sutra of हैम व्याकरण to which the verse refers.

रसरुधिरविमुक्तं भाति केषां शरीरं,
रसभरभरितः किं काव्यविज्ञाय पाठः ।
अभिमतमभिधानं धीविहीनस्य कीदृक्,
स्मरतु लघु तृतीयाध्यायपादं द्वितीयं ॥४९॥

The answer to the first line is देवानाम्, to the second, प्रियः and to the third, देवानांप्रियः thus we get the Sutra देवानांप्रियः ( ३-२-३४ ). The same device of hinting at the Sutras by means of questions is employed in the following verse of which the previously quoted anonymous verse "धीरः कीदृग्" is the prototype :—

शरीरं कीदृक् स्यादमरनिकरे जन्मजनितं,
कुशिष्याणां वृत्तं भवति किमु कीदृक् पदचयः ।
वचः कान्तं किं किं मृदुलपदमामन्त्रणकृते,ऽ-
प्ययं सूत्रं हैमं सपदि यदि दक्षो निगदताद् ॥६॥

The answers to the five questions posed in this verse are, in order, अधातु, विभक्ति ( which here means devoid of devotion ), वाक्यम्, अर्थवत् and नाम, and these taken serially yield the हैमसूत्र intended, which is अधातुविभक्तिवाक्यमर्थवद् नाम ( १-१-६ )..

Several different devices are used in लक्षणविलास to supply cues to the required answer, such as addition, removal or substitution of letters; demanding opposite words in answer to the question asked; inclusion of the individual letters of the Sutras along with cues for their identification. In some verses the required Sutra is suggested by means of the synonyms of the words comprising the Sutra. In others, particular alteration in the words of the verse are suggested as helping to locate the Sutra. The devices employed to hint at solution are too many to be described here exhaustively. The reader is referred to the list of various kinds of cues, which is, I understand, to be appended to this volume. The Panjika ( commentary ) given under each verse is meant only to clarify the cues, not to suggest solution, though

it does so on a few rare occasions.

What purpose, it may be asked, is expected to be served by these grammatical riddles ? The verses are not intended to be pure poetry, whatever casual poetic merit they may attain to in stray instances. But they do challenge the reader's ingenuity and thereby endow with a welcome interest a subject which would otherwise prove dry and uninvitive. To present a challenging problem to the intellect is to excite interest; and to excite interest is to vitalize the mind and thereby to fix the Sutra, arrived at as answers, firmly in the memory. This work, लक्षणविलास: is of course meant not for the general reader but for the reader who is a student of Sanskrit grammar and, in particular to a student of सिद्धहैमव्याकरण. Such a one is the Adhikari reader of these verses, And if the reader posses this Adhikara, this लक्षणविलास: will, as the first verse claims, brinig him in direct touch with the Sutras covered, and will prove to be an उत्सवरूप: विलास: a festive entertainment—in the province of grammar. Let it not be overlooked that the learned author addresses this work only to such Adhikari readers. I can say that to such readers it will afford pleasure with profit.

—Ramprasad P. Bakshi.

* ॐ ह्रीं अर्ह नमः *

# लक्षरण-विलासः

[ अनुष्टुप् ]

अर्हमादिमहैमीय – लक्षणाध्यक्षवीक्षणः ।
स्ताल्लक्षणविलासेन, विलासो लक्षणे क्षणः ॥१॥

( पञ्जिका )

*अर्हं नत्वा परं मन्त्र–मार्हतं बीजमादिमम् ।*
*तनुमः पञ्जिकामत्र, विद्वन्मानसरंजिकाम् ॥१॥*

अर्हमिति मङ्गलात्मकपदाद्यावयवकश्रीसिद्धहेमचन्द्रीयशब्दानुशासनप्रत्यक्षदर्शनः, उत्सवरूपो विलासो व्याकरणविषयो लक्षणविलासाख्येनानेन काव्यदेशीयेन खण्डकाव्येन भवतु ॥१॥

[ शार्दूलविक्रीडितम् ]

यत् पूज्यं परमार्हतं परतरं माङ्गल्यमालास्पदं,
यत् पञ्चाक्षरमक्षरं मुनिगण–ध्यानाधिरूढं महः ।
यद् ध्यातं स्थिरतान्वितेन मनसा स्वर्गापवर्गावहं,
हैमं मन्त्रमतन्त्रतन्त्रतिलकं, तत् किं समाराध्यते ॥२॥

( पञ्जिका )

यत् पूजनीयम् उत्तमार्हतां सम्बन्धि श्रेष्ठतरं श्रेयःश्रेणिसदनम् ( अस्ति ), ( पुनः ) यत् पञ्चवर्णात्मकम् अव्ययस्वरूपम्, साधुसमूह-ध्यानविषयीभूतं तेजः ( अस्ति ) ( अपि च ) यत् स्थिरचित्तेन ध्यान-विषयीकृतं सत् सुरसदन-मोक्षनिलयदायकम् ( अस्ति ) तत् स्वतन्त्र-शास्त्रतिलकरूपं हैमं मन्त्रभूतं किं समाराध्यते ? उच्यतां प्रतिवचः ॥२॥

[ शिखरिणी ]

अयोगानां योगाद् भवति किमु कर्मक्षयमयी,
पदं नानाधर्मा-वगमगमकं किं परिचितम् ।
जयो वा सिद्धान्तः प्रभवति कुतः साधुकरणाद्,
भवेत् का शब्दानां कुत इति पठेद्धैमवचनम् ॥३॥

( पञ्जिका )

(१) योगरहितानामात्मनां सम्बन्धेन यद्वा परमगुणस्थानस्थितानां वर्ययोगतः सकलकर्मक्षयात्मिका का स्यात् ? (२) विविधविरुद्धधर्म-बोधजनकं किं पदं प्रसिद्धम् ? (३) सुष्ठु विधानात् कस्मात् किल विजयो निश्चयो वा जायते ? (४) कस्मात् ननु सामर्थ्यात् शब्दानां का स्यात् ? इति प्रश्नचतुष्कोत्तरार्थं हैमवचनं-श्रीसिद्धहेमचन्द्रशब्दा-नुशासनसत्कं सूत्रमभ्यस्येत् ॥३॥

[ आर्या ]

व्याकरणं यदि पुरतो व्यालः पुरतः पुरस्कृतो भवति ।
अति कृष्टे स्याद् दुःखा-न्नैवाकृष्टे तु विपरीतम् ॥४॥

( पञ्जिका )

एकमेतादृशं सूत्रं स्मर्यताम्—यस्य पुरतः- प्रथमं व्या-करणं 'व्या' इत्यक्षरविधानं यदि-तदाऽग्रे व्यालो भवति प्रकटः, ततश्चाकारे

छेदिते सति दुःखत इति ज्ञापकं शब्दरूपं स्यात् नच्छेदितो यद्यकार-स्तदा तु दुःखाद्विपरीतं सुखत इत्यवगमकं स्यात्, किं तत् सूत्रम्? वदतादिति ॥४॥

[ शार्दूलविक्रीडितम् ]

रूपं कीदृगदो भवं प्रथमया, स्याद्भूम्नि पुंसि स्थितं,
कीदृक् स्याद्विनयान्वितः समुदये स्यात् सैनिकः कीदृशः ।
नामी किं किल प्राकृते प्रविदितं, ना कः प्रसिद्धः क्षितौ,
के चन्द्रोज्ज्वलकीर्तयः पुनररुक्, को हैमसूत्रं स्मर ॥५॥

( पञ्जिका )

(१) पुँल्लिङ्गे प्रथमाबहुवचने अदःशब्दसम्भवं रूपं कीदृशं भवेत्? (२) विनयगुणयुक्तो विनेयः कीदृशः स्यात्? (३) समुदये संग्रामे सैनिकः कीदृक्षः स्यात्? (४) 'नामी' इतिपदं प्राकृतभाषायां किल कीदृक् प्रविदितम्? (५) भुवि प्रसिद्धः पुरुषः कः? (६) चन्द्रधवल-यशसः-शरच्चन्द्रचन्द्रिकाविशदकीर्तयः के? (७) रोगरहितः कः? इति प्रश्नसप्तकं सम्यग् विचार्य हैमव्याकरणसूत्रं स्मृत्वोत्तरं वितीर्यताम् ॥५॥

[ शिखरिणी ]

शरीरं कीदृक् स्या-दमरनिकरे जन्मजनितं,
कुशिष्याणां वृत्तं भवति किमु कीदृक् पदचयः ।
वचः कान्तं किं किं मृदुलपदमामन्त्रणकृतेऽ-
व्ययं सूत्रं हैमं सपदि यदि दक्षो निगदतात् ॥६॥

( पञ्जिका )

(१) देवसमुदाये जन्मसम्भवं वपुः कीदृशं भवेत्? (२) दुर्विने-यानामाचरणं कीदृग् भवति? (३) पदसमूहः कीदृक्षः? किं पदवाच्य इति यावत्? (४) कमनीयं वचनं किम्? कीदृशं वचनं रमणीयं

भवतीति यावत् ? (५) सम्बोधनार्थं कोमलपदमव्ययं किम् ? चेद् दक्षोऽसि त्वं तदा हैमव्याकरणसूत्रं वद ॥६॥

[ शिखरिणी ]

समानानां तेन स्वरससमदीर्घस्थितिमिताः,
समानानां तेन स्वरससमदीर्घस्थितिमिताः ।
'समाना' नान्तेन स्वरस 'सम' दीर्घस्थितिमिताः,
समाना नान्तेन स्वरससमदीर्घस्थितिमिताः ॥७॥

( पञ्जिका )

प्रस्तुतशिखरिण्याः पादचतुष्टयं समानमेव, तत्र 'समानानां तेन दीर्घः' ।१।२।१। इति सूत्रं व्यक्तमन्तर्निहितमास्ते । अर्थविचारणायां तु प्रतिपादं निम्नप्रकारेण भिन्नभिन्नार्थमित्थं विचारणीयम् । (१) अप्रमुखस्वरदशकात्मकसमानस्वराणां समानेन स्वरेण सह स्वाभिलषितसमानो दीर्घस्वरो जायते इति शेषः । (२) 'स्थितिमिताः' इति प्रथमचरणावशिष्टमत्र द्वितीयपादे संयोज्यम् । एवञ्च स्थितिमिताः समाः नानान्तेन स्वरससमदीर्घस्थितिम् इताः, इत्येवमन्वेयम् , तथाच मर्य्यादांप्राप्ताः समभावशालिनः शमिनो विविधावसानेनापि निजानुरागानुरूपविस्तृतावस्थानम् अधिगता इति तदर्थः । (३) समाना नान्तेन स्वरससमदीर्घस्थितम् इताः इति तृतीयपादान्वयस्तथाच 'समाना' इत्यात्मकत्रयो वर्णा नान्तेन 'ना' इत्यक्षरापसारणेन स्वरेति स्वानुरूपा-'सम' इत्यक्षरयुगलस्य या दीर्घस्थितिः 'समा' इत्यात्मिका, ताम् इताः-अवाप्ता इत्यर्थः । (४) तुर्यपादान्वयस्त्वित्थम्-समानाः अन्तेन स्वरससमदीर्घस्थितम् न इता इति । तथाच मानकषायकलुषिता मरणेनापि निजेप्सितशमसमन्वितदीर्घायुःस्थितिं नाध्यगच्छन्निति ॥७॥

[ अनुष्टुप् ]

सुरेशत्वं भवेत् कस्मिन्, कस्मिन् ज्ञानं विराजते।
कस्मिन् प्रीते सुभिक्षं स्यात्, स्मराशु हैमलक्षणम् ॥८॥

( पञ्जिका )

(१) देवानामधिपतित्वं कस्मिन् भवेत् ? ( २ ) ज्ञानं कुत्र विलसति ? (३) कस्मिन् प्रसन्ने सति सुकालः स्यात् ? अत्रोत्तरं दातुं हैमं व्याकरणं त्वरितं स्मृतिपथमानय, सूत्रं ब्रूहीति यावत् ॥८॥

[ शिखरिणी ]

पवर्गाद्यं षष्ठं प्रथममिह तद्वर्गचरमं,
स्थितं द्वैतीयीकं तदनु च तवर्गस्य चरमम् ॥
ततोऽरान्तस्थानां त्रयमपि सदामन्त्रणकृते-
ऽव्ययद्वन्द्वं प्रान्ते स्मरतु विशदं सूत्रमुदितम् ॥९॥

( पञ्जिका )

अत्राभिमतस्य सूत्रस्य षष्ठमक्षरं पवर्गस्य प्रथमम्, पवर्गस्यैव चरममक्षरं प्रथमम्, तवर्गस्य चरममक्षरं द्वितीयम्, मध्ये तृतीयतुर्य-पञ्चमस्थाने रेफरहितास्त्रयोऽप्यन्तस्थानां वर्णाः, अन्ते सप्तमाष्टमस्थाने प्रसिद्धमामन्त्रणवाचकमव्ययुगलं विलसति। उक्तप्रकारेणाक्षरकदम्बक-मेकीकरणे यत् स्यात् तदेव प्रस्तुतं सूत्रमास्ते ॥९॥

[ अनुष्टुप् ]

मो व्यञ्जनेऽननुस्वारे, नाम किं चक्रवर्तिनः।
एकशब्दकृते त्वेकं, सूत्रं व्याकरणे च किम् ॥१०॥

( पञ्जिका )

सर्वत्र मकारात् परे व्यञ्जने सत्यनुस्वारो भवत्येव, परं तादृशं राजराजस्य किमभिधानमास्ते, यत्र मकारस्य व्यञ्जने परे सत्यपि

नानुस्वारः स्यात्, एतत्सिद्धये व्याकरणे स्वतन्त्रं सूत्रं वर्तते, तत् संस्मृत्य वाच्यमिति ॥१०॥

[ अनुष्टुप् ]

शस्त्रमस्त्रं न शातं, चे न्न शात्रवं पराभवेत् ।
द्विरुक्तं लक्षणं हैम,- मत्र मासेन लक्ष्यताम् ॥११॥

( पञ्जिका )

शरासिप्रमुखं शस्त्रमस्त्रं चेत् तीक्ष्णं न तदा शत्रूणां वृन्दं पराजयपदवीं नाप्नुयात् । अत्र पूर्वार्धे हैमव्याकरणसत्कं सूत्रं द्विवारमुक्तमस्ति, तन्मासमध्येऽवबुध्यताम् । एतदवगन्तुं मासोऽवधिस्ते वितीर्णोऽस्ति, तन्मध्येऽपि चेत्तवावगमस्तदा त्वं लक्षणविन्नान्यथेति ॥११॥

[ इन्द्रवज्रा ]

संसारचक्रे प्रसरन्ति कस्या, राज्ञां वचो राजकमानयेत् कः ।
दायादयः केन भवन्ति नित्यं,स्मृत्वा वद व्याकरणं नु हैमम् ॥१२॥

( पञ्जिका )

(१) भवमण्डले ( जीवाः ) कुतो भ्रमन्ति ? (२) नरपतीनां सन्देशवचनं राज्ञां समूहं कः प्रापयेत् ? (३) दायादय आदेशाः केन निर्विकल्पं भवन्ति ? हैमशब्दानुशासनं संस्मृत्य वद ( प्रतिवचः ) ॥१२॥

[ इन्द्रवज्रा ]

युक्तेऽक्षरे कस्य भवेद्गुरुत्व,- मेदोदरां व्याकरणे क्रिमुक्तिः ।
स्वभ्यस्त आद्यस्य चतुर्थपाद,-श्चेत्तूर्णमाख्यातु गुणार्हसूत्रम् ॥१३॥

( पञ्जिका )

(१) संयुक्ते वर्णे परे सति कस्य गुरुत्वं भवेत् ? (२) एत्-ओत-

अर्-इत्येतेषां व्याकरणे का संज्ञा ? यदि प्रथमाध्यायस्य तुर्यपादे समधीती तदा त्वरया गुणयोग्यः श्रीमान् गुणकार्य्यकरणसूत्रं वदतु ॥१३॥

[ उपजातिः ]

सन्ध्यक्षराद्यादिममस्ति सूत्रं, विसर्गतो नैव विसर्जितं यत् ।
इकारमाकारतया विधत्ते, दक्षोऽसि चेत्तद्वद मासमध्ये ॥१४॥

( पञ्जिका )

सन्ध्यक्षरसत्कप्रथमाक्षरात्मकं विसर्गसमन्वितं सूत्रमस्ति । एतादृशं तत् इकारमाकाराकारेण परिणमयति, चेत् त्वं शब्दशास्त्रनिपुणस्तदा मासाभ्यन्तरमनुसन्धाय वदेति ॥१४॥

[ अनुष्टुप् ]

अन्तस्थान्तः स्थिता वर्णा, अन्तस्थासु न सम्मताः ।
अस्ताश्च यत्र सूत्रं तत्, त्रिव्यञ्जनं स्वरैककम् ॥१५॥

( पञ्जिका )

व्यञ्जनत्रयघटितमेकस्वरसंवलितञ्च सूत्रं वर्तते तदन्वेषणीयम्; यत्सूत्रस्थिता वर्णा अन्तस्थासंज्ञारहिता अपि 'अन्तस्था' मध्ये वर्तन्ते, अस्ताः पुनः अर्थात् सकारतकाराकाराकाररूपा न सन्ति, तत् किमित्युच्यताम् ॥१५॥

[ वियोगिनी-सुन्दरी ]

प्रथमं प्रथमैकवागवचः, पयसो गीतमथो द्वितीयकम् ।
ङिपरं पवनाशनेशितुः, स्मृतिमाधाय वदन्तु लक्षणम् ॥१६॥

( पञ्जिका )

(१) यत्र सूत्रे प्रथमं पयसो वाचकः शब्दः प्रथमैकवचनान्तः पठितः । ततश्चापरो नागराजाभिधायकः शब्दः सप्तम्येकवचनो वर्तते, स्मरणं विधाय लक्षणसूत्रं व्याक्रियतामिति ॥१६॥

[ अनुष्टुप् ]

कामः काष्टगुणः पुंसः, कस्यां माया महोद्धता ।
कस्यां सत्यां न मुक्ताः स्यु-स्तदर्थं स्मर लक्षणम् ॥१७॥

( पञ्जिका )

(१) पुरुषापेक्षया मदनोऽष्टगुणाधिकः कुत्र ? (२) प्रबला निकृतिः कस्याम् ? (३) कस्यां विद्यमानायाम्-स्वसम्बन्धसम्बन्धितायामिति यावत् ( चेतनाः ) शिवशर्मिणो नो भवेयुः ? ततप्र्यनुयोगत्रयमुत्त-रीतुं कामकेतनात्मकं व्याकरणसूत्रं स्मृतिगोचरं विदध्याः ॥१७॥

[ अनुष्टुप् ]

निःशेषे लुग् भवेद्विश्वे, सतां सर्वत्र सम्मतम् ।
चित्रं व्याकरणे हैमे, विपरीतं विभाव्यते ॥१८॥

( पञ्जिका )

जगति शेषाभावे सति लुग् भवति, तत् सज्जनानां सर्वविषये-ऽभिमतम्; परमाश्चर्यमेतद्यत् किल हैमव्याकरणे विपरीतं विरुद्धं विभाव्यते । अत्र श्लोके 'निःशेषे लुग्' इत्यत्र निहितं विरुद्धं सूत्रं समुद्भावनीयमिति ॥१८॥

[ द्रुतविलम्बितम् ]

भवति किं सहबोधकमव्ययं, तुपरतस्तु किमास्वरयोगतः ।
हरिप्रियाप्रियनाम किमक्षरं, कथय दक्ष विचक्षणलक्षणम् ॥१९॥

( पञ्जिका )

(१) सहार्थबोधकमव्ययं किं भवति ? (२) 'तु' इत्येतस्माद्वर्णात् परतः 'आ' इत्येतत्स्वरसम्बन्धात् किं स्यात् ? कीदृक् सन्धिसम्पादितं रूपं भवेदिति यावत् ? (३) विष्णुप्रियाया एकवर्णं प्रियतरमभिधानं किम् ? अत्र प्रश्नत्रितयोत्तरार्थम् अयि चतुरचण व्याकरणं वद ॥१९॥

[ अनुष्टुप् ]

भव्यात्मानः कुतो मुक्ता, वियुक्ता हर्षिताः कुतः ।
चेत् त्र्यक्षरमरं सूत्रं, ज्ञातं नैव विषद्यताम् ॥२०॥

( पञ्जिका )

(१) भव्याः-मुक्तिगमनयोग्याश्चेतनाः कुतः कारणतो मोक्षमाप्ताः ? (२) कुतः-कस्माद् वियोगिनः प्रमुदिताः ? इत्येतत्प्रश्नद्वयोत्तरार्थं त्रिवर्णं रहितं सूत्रं सत्वरं यदि विबुद्धं तदा विषादं न खलु विदध्याः, नैवावगतं तदा खिद्यतामिति ।२०॥

[ भुजङ्गप्रयातम् ]

पदं नाप दान्तेषु कर्मप्रपञ्चः,
पदान् तेजसां सम्पदः प्राप्नुवन्ति ।
पदाऽन्तेऽन्तमाप्स्यन्त्यनेनान्तकस्य,
व्यनक्त्वत्र सूत्रं त्रिधा सन्निगूढम् ॥२१॥

( पञ्जिका )

दान्तेषु-मुनिषु कर्मविस्तारः स्थानं नाप न प्राप, मुनयः सम्पत्तेः तेजसां क्रमान् किरणानि वाऽधिगच्छन्ति, अन्ते-प्रान्ते ( मुनयः ) अनेन पदा-पद्धत्या चरणेन अन्तकस्य-मृत्योः कालस्य अन्तम्-प्रशमम् प्राप्स्यन्ति । इत्येवमुपरि पादत्रये त्रिवारं सूत्रं-हैमसूत्रमन्तर्निहितमास्ते, तद् किमिति प्रकटयतु ॥२१॥

[ शिखरिणी ]

विना ज्ञानं श्रेयो वितरति न का मन्दमदनाऽ-
नुमाने कर्तव्येऽभिमत इह को व्याप्तिमदनम् ।
विभक्तीनां नाम्नो व्यवसितिपरं किं प्रकरणं,
यदि त्वं वैदुष्यं वहसि रहसि व्याकुरु तदा ॥२२॥

( पञ्जिका )

(१) ज्ञानमन्तरेण विरलविषयाऽपि समुत्कटमदना सती वा का क्षेमं न दत्ते ? (२, अनुमाने विधातव्ये सति इह प्रमाणशास्त्रे व्याप्ति-स्थलभूतः कोऽभीष्टः ? (३) नामसंज्ञकात् विभक्तीनां नियमनतत्परं प्रकरणं किम् ? इति प्रश्नत्रयव्याकरणार्थं चेत् त्वं पाण्डित्यं धरसि तदा एकान्ते-सर्वजनसमक्षं यदि तव त्रपा भवति तदा-निर्जने प्रकटी-कुरूत्तरम् ॥२२॥

[ वसन्ततिलकम् ]

कीदृग् भवेन्निजकृतेः करणे समर्थो,
नैयायिकैरभिमतो जगतः प्रभुः किम् ? ।
अभ्यस्तमस्तरुगनस्तसमस्ततन्त्रं,
सूत्रं विचार्य्य विशदं वद हैममन्त्रम् ॥२३॥

( पञ्जिका )

(१) स्वकीयकार्य्यस्य विधाने सामर्थ्यकलितः कीदृशः स्यात् ? (२) न्यायदर्शनानुसारिभिरीश्वरो विश्वस्य किमभिमतः ? अत्र प्रति-वचसेऽभ्यासविषयीकृतं जाड्यादिरोगहरं समस्ततन्त्रोपजीवनं हैमलक्षण-मननात्मकं सूत्रं विचारपदवीमापाद्य स्पष्टं ब्रूहि ॥२३॥

[ अनुष्टुप् ]

प्रादुर्भवेत् फलं कस्य, गमकं व्यापकस्य किम् ।
संसारकारणं किं स्यात्, सूत्रात् प्रतिवचो वृणु ॥२४॥

( पञ्जिका )

(१) फलं कस्य प्रकटं स्यात् ? (२) अधिकदेशवृत्तिनो व्यापकस्या-वगमकं किं भवति ? (३) भवचक्रपरिभ्रमणनिदानं किं भवेत् ? एतत्त्रयोत्तरत्रितयं श्रीहैमशब्दानुशासनसत्कसूत्रतः प्राप्नुहि ॥२४॥

[ मालिनी ]

भवति रतिपतिः कः कामिनीनां सतीनां,
हतदुरितदुरन्तै – रर्थिभिः प्राथ्यते कः ? ।
जगति सुजन – योगक्षेमकर्ता मतः को,
वदतु लघु नवर्गाद्वर्णयुग्मं गृहीत्वा ॥२५॥

( पञ्जिका )

(१) सतीनां सीमन्तिनीनां कामकल्पः को भवति ? (२) निकृष्ट-कल्मषदुःखैर्याचकैः को याच्यते ? (३) विश्वे सुजनजनानां योगक्षेमयोर्विधाता कः ? अत्र प्रतिवचनार्थं तवर्गतो वर्णद्वयं लात्वा शीघ्रं वदतात्, अर्थात् तादृक् सूत्रमनुसन्धेयं यत्र तवर्गीयाक्षरद्वयमेव भवेत् ॥२५॥

[ शालिनी ]

धातोरर्थे स्यात् कुतस्तारतम्यं, श्वभ्रं कस्याश्चेतनो नैति धन्यः ।
कस्मात् का वै साधवः प्राप्नुवन्ति, प्राशस्त्यं चेद्धैमसूत्रे वदारम् ॥२६॥

( पञ्जिका )

( ) धातोरर्थे वैषम्यं परिवर्तनं वा कुतो भवेत् ? (२) पुण्य-प्रबल आत्मा नरकं कुतो न याति ? (३) मुनयः खलु कुतः काः समधिगच्छन्ति ? चेत्तव श्रीसिद्धहैमसूत्रे विशदता वर्तते तदा त्वरित-मुक्तप्रश्नानामुत्तरार्थं तत् सूत्रं ब्रूहि ॥२६॥

[ अनुष्टुप् ]

अनलेऽस्ति नलेऽप्यस्ति, निषेधार्थेऽतिरोहितम् ।
द्विरुक्तं सद्विधिं सूते, सूत्रमेकाक्षरं स्मर ॥२७॥

( पञ्जिका )

तादृशमेकाक्षरमस्ति सूत्रं यत् अनलेऽस्ति नलेऽप्यस्ति, निषेधे

कर्तव्ये तव तिरोहितं न भवति, द्विवारं तदुक्तं सत् विधिं सूते । किं तत् ? सूत्रं स्मृतिमानय ॥२७॥

[ शिखरिणी ]

अपाये पापानां नयनविषयीभावमयतेऽ-
वधिः सिद्धीनां यो निरवधिनिधीनां वितरणम् ।
अपादानं कर्ता भवभवभयानामतितमां,
नमस्तस्मै नित्यं जिनवृषभवीराय सततम् ॥२८॥

( पञ्जिका )

पापानां विगमने सति यो लोचनगोचरीभवति, सिद्धीनां यो मर्य्यादा, अनन्तनिधीनां यो दायकः, संसारसम्भवसाध्वसानामतिशयेनापहर्ता यः, तस्मै सन्ततं जिनोत्तममहावोरस्वामिने सर्वदा नमोऽस्तु । सूक्तेऽत्राचरमपादत्रितयादिमपदानां संयोजनात् सूत्रं हैमीयं प्रादुर्भवति ॥२८॥

[ शार्दूलविक्रीडितम् ]

केनास्मिन् किल कारकप्रकरणे, व्याप्ता द्वितीया भवेत्,
तत्सूत्रार्थमयं नतोन्नतपथो, नव्योऽविसर्गः कृतः ।
इत्युक्ताद्यदि नावगच्छसि तदा, चिन्ता समुत्सार्यतां,
भूयात्ते सकलेप्सितार्थतरणिः, कर्तव्यचिन्तामणिः ॥२९॥

( पञ्जिका )

अस्मिन् व्याकरणे हैमे कारकप्रकरणे व्यापकद्वितीयाविभक्तिः केन सूत्रेण स्यात् खलु इत्ययं प्रश्नः । तदुत्तरकृते अयं पुरः प्रदर्श्यमानः पन्था वर्तते, तत्पथेन तत्सूत्रमानेयम्, स च मार्गः–'कर्तव्यचिन्तामणिः' इत्येतद्रूपो नतोन्नतः, नव्यः, अविसर्गो वर्तते । इत्येतावत् कथनेऽपि यदि तव बोधो न भवति तदा चिन्ता दूरीकरणीया । यतस्तवायं कर्तव्य-

चिन्तामणिः सकलसमीहितपदार्थप्रकाशकसहस्रकरो वितीर्णोऽस्ति। उपरि नतोन्नतः, नव्यः अविसर्गं, चिन्ता इत्येतदर्थविशेषद्योतकमवसेयम्॥२९॥

[ शालिनी ]

धातोरर्थः किं भवेल्लक्षणोक्तः, कस्माद्धाना नो विशेष्यं विशिष्टम्।
क्लीबं कस्माज्जायते जातु नित्यं, स्मारं स्मारं प्रोच्यतां सूत्रमुच्चैः॥३०॥

( पञ्जिका )

(१) व्याकरणशास्त्रोक्तो धातोरर्थः कः ? (२) कुतो विना विशेष्यं विशिष्टं न स्यात् ? (३) नित्यशो नपुंसकलिङ्गं कुतो भवति नु ? एतदर्थावगमकं सूत्रं स्मृत्वा स्मृत्वा तारस्वरेण प्रोच्यताम् ॥३०॥

[ अनुष्टुप् ]

श्यामगजो ङसि प्रान्तो, नूत्नाधिकरणेऽन्तिमः।
पर्यायवचनैर्वाच्यं, सूत्रं कारकसात्कृतम् ॥३१॥

( पञ्जिका )

(१) श्यामगजपर्यायशब्दः पञ्चम्येकवचनङसिप्रत्ययान्तः प्रथमः स्थाप्यः। (२) ततश्च नूतनाधिकरणवाचकशब्दः सप्तम्येकवचनः प्रान्ते निवेश्यः। एवञ्च कृते यद्भवेत् तत् सूत्रं कारकसत्कं वर्तते, किं तत् ? कथ्यतामिति ॥३१॥

[ शिखरिणी ]

तवर्गान्त्यो वर्णो यदि च करणीयोऽस्ति चरम-
ष्टवर्गस्य स्थाप्यः परमिह न सोऽन्ते कुत्रचन।
पदं चैकं कार्यं रषऋपरतोऽमुं विरचये-
च्छसायुक्ताः कार्या न लचटतवर्गा व्यवहिताः ॥३२॥

( पञ्जिका )

नकारो णकारात्मना परिणमनीयोऽस्ति तदर्थं युक्तो विधिर्विधेयः

(१) नो न स्थाप्यः कदापि प्रान्तभागे। (२) भिन्नपदे नकारो नैव रक्षणीयः। (३) रेफ-षकार-ऋवर्णेभ्यः परः स नकारः करणीयः। (४ निमित्तनिमित्तिनोर्मध्ये च-छ-ज-झ-ञ-ट-ठ-ड-ढ-ण-त-थ-द-ध-न-ल-श-से-त्यष्टादशाक्षराणि व्यवहिततया न कार्याणि। सूत्रतोऽयमर्थः प्रत्यटीकार्य्यः ॥३२॥

[ उपजातिः ]

**विना विना मध्यलघूकृतोऽन्त्यो, द्विरुक्तिमाप्तोऽत्र धृतो विनाशः।**
**नशो नकारस्य णकारतायै, तूर्णं त्रिवर्णं वद सूत्रमुक्तम् ॥३३॥**

( पञ्जिका )

विवर्णे वियुक्ते मध्यमवर्णस्य लघुत्वे कृते, अन्त्यवर्णस्य द्विर्भावे आपादिते सति 'विनाशः' इत्यस्य यत् स्यात् तत् सूत्रं नशधातोर्नकारं णकारं विधत्ते, वर्णत्रयात्मकं तदत्रोक्तं सूत्रं सत्वरं ब्रूहीति ॥३३॥

[ द्रुतविलम्बितम् ]

**भवति कुत्र नरत्वमनावृतं, क्क रमते ग्रहजं दिनसप्तकं।**
**अमुखवर्णगणः क्क प्रकाशते, स्मर मनोरमलक्षणमक्षतम् ॥३४॥**

( पञ्जिका )

(१) पौरुषं प्रकटं क्क वर्तते ? (२ ग्रहजनितं वासरसप्तकं कस्मिन् विलसति ? (३) अकारादिवर्णसमूहः कुत्र चकास्ति। उत्तर-त्रितयकृते सुन्दरं सम्पूर्णं व्याकरणं स्मृतिमानयेति ॥३४॥

[ अनुष्टुप् ]

**कुर्युर्विमध्यमाः कस्मिन्, दानं ध्यानं विमध्यमम्।**
**कस्मिन् विभक्तयोऽधातौ, कस्मिन्नर्थाश्चकासति ॥३५॥**

( पञ्जिका )

( १ ) किन्निमित्तं विमध्यमा जना दानादिकं विमध्यमं विदध्युः ?

इह जनाः षड्विधाः, उत्तमोत्तमाः, उत्तमाः, मध्यमाः, विमध्यमाः, अधमाः, अधमाधमाश्च । तेषु- १- ये स्वहितं सम्पूर्णं साधयित्वा परहितायोद्यतास्ते प्रथमाः । २- ये स्वात्महितमेव साधयन्ति ते द्वितीयाः । ३- ऐहिकमुपेक्ष्य ये पुनरामुष्मिककृते यतन्ते ते तृतीयाः । ४- ऐहिकमनुपेक्ष्य पारत्रिकं सम्पादयन्ति ये ते तुर्याः । ५- ये परत्र हितमुपेक्ष्यैहिकोद्यतास्ते पञ्चमाः । ६- ऐहिकपारत्रिकविकला ये ते षष्ठाः । (२) धातुभिन्ने क विभक्तयो भवन्ति ? (३) अर्थवत्त्वञ्च कुत्र ? सूत्रमुपादीयताम् ॥३५॥

[ अनुष्टुप् ]

नैयायिकैर्मतं ज्ञान–साधनं किमणूच्छ्रितम् ।
गीतायां चञ्चलं गीतं, किन्तत् स्मरतु सूत्रतः ॥३६॥

( पञ्जिका )

( १ ) ज्ञानकरणोपयुक्तमणुप्रमाणं न्यायशास्त्रकोविदैः किं मतम् ? (२) गीतायां चञ्चलं किं गीतमास्ते ? सूत्रं संस्मृत्योत्तरमाप्यतामिति॥३६॥

[ वसन्ततिलका ]

स्याद्वा नरस्य नरतो विभिदोच्चपुच्छात्,
पिच्छाद्विभान्ति शिखिनस्तुरगाश्च पुच्छात् ।
जीवाः पुनः कतिपये विषमा द्विपुच्छात्,
स्वाङ्गात् स्त्रियां भवति ङीर्ननु वाऽत्र पुच्छात् ॥३७॥

( पञ्जिका )

मर्कटस्य मनुष्यादन्तरं लम्बायमानदीर्घलाङ्गुलतो भवेत् । कलापिनः पिच्छकलापतः शोभन्ते हयाश्च पुच्छतः । केचन मत्स्यविशेषाः क्षुद्रजन्तवः पुनः पुच्छद्वयतो विचित्रा भवन्ति, स्वाङ्गतः परात् पुच्छ-शब्दात् स्त्रीलिङ्गे अत्र हैमव्याकरणे ङीप्रत्ययः खलु जायते ॥३७॥

[ मन्दाक्रान्ता ]

प्रातःकाले प्रसरति रविर्दीप्तिमान् कुत्र भागे,
सायंकाले पुनरपि भवेत् किञ्च तस्यापरस्याम् ।
श्रेयःकाले वितरति पदं कीदृशं कर्मनाशः,
सूत्रं हैमं प्रतिवद यदि व्याकृतौ व्याकृतिस्ते ॥३८॥

( पञ्जिका )

(१) प्रभातसमये रश्मिसहस्रपरिकरितः सूर्य्यः क भागे प्रसारमादधाति । (२) सायंसमये सूर्य्यस्य पुनरपि पश्चिमायां दिशि किं स्यात् ? (३) निःश्रेयससमये सकलकर्मविध्वंसः कीदृक् स्थानं ददाति । यदि तव व्याकरणविषये वैशद्यं वर्तते तदा हैमलक्षणोपलक्षितं सूत्रं प्रत्याचष्टाम् ॥३८॥

[ अनुष्टुप् ]

समीपे परमात्माऽऽस्ते, विनाभ्यासं न दृश्यते ।
अस्ति सूत्रं समीपे ते, विनाऽभ्यासं न दृश्यते ॥३९॥

( पञ्जिका )

परमात्माऽर्हन् समीपस्थित एव वर्तते परन्तु अभ्यासं विशदाभासं विना न प्रत्यक्षीभवति । एवमेव तव सूत्रं 'समीपे' वर्तते परम् अभ्यासं मननमन्तरेण न खलु ज्ञायते ॥३९॥

[ अनुष्टुप् ]

राजते मुदिरः कीदृक्, कीदृग् वर्णेन कज्जलः ।
कृतान्तानेहसोर्मृत्योः, कः शब्दो वद लक्षणम् ॥४०॥

( पञ्जिका )

(१) कीदृक्षो वारिदः शोभते ? (२) मषीपुञ्जो वर्णेन कीदृशः

(३) यमस्य समयस्य मरणस्य चैकं नाम किम् ? व्याकरणं विचार्य सूत्रतः प्रतिवचनं वद ॥४०॥

[ अनुष्टुप् ]

आद्यः किमस्ति प्रत्यक्षे—समीपे मध्यमान्तिमौ ।
स्पष्टमुक्तमिदं सूत्रं, त्र्यक्षरं किन्न बुध्यते ॥ ४१ ॥

( पञ्जिका )

तादृशमक्षरत्रितयात्मकं सूत्रं वर्तते यस्य प्रथमं किम् अस्ति, द्वितीयतृतीये क्रमशः प्रत्यक्षे समीपे च स्तः, एवमन्वेषणीयं सूत्रं स्पष्टमुक्तं भवति, अथापि किं न ज्ञायते ? ज्ञातेन तेन भवितव्यमिति ॥४१॥

[ अनुष्टुप् ]

विक्षेपे ध्यानिनो भग्नाः, संक्षेपे ननु भूभृतः ।
निक्षेपे भूसुराः सक्ताः, सूत्रं किमुपमर्जितम् ॥४२॥

( पञ्जिका )

विक्षेपे चित्तस्य जाते सति ध्यानमग्ना भग्ना भवन्ति । संक्षेपे सति लाघवे सम्पन्ने राजानो नगाश्च भग्नाः स्युः । ब्राह्मणः निक्षेपे संग्रहे सक्ताः सन्तो भग्ना जायन्ते । अत्र सूत्रमुपसर्गीभूतकिमाकलितं वर्तते; अर्थात् व्याद्युपसर्गत्रयमपास्य तत्स्थाने किं स्थापिते सति सूत्रं प्रादुर्भवतीति ॥४२॥

[ अनुष्टुप् ]

पाल्यते सद्गृहस्थेन, कुमारः श्रमणादिना ।
व्रतिना हन्यते कामं, कुमारः श्रमणादिना ॥४३॥

( पञ्जिका )

द्वितीयाश्रमस्थितेन सज्जनेन कुमारः किशोरः परिश्रमप्रभृतिना संरक्ष्यते, अथाहिंसादिव्रतव्रातधारिणा मुनिप्रमुखेन कुमारः कलुषित-

स्मरः बाढं ध्वंस्यते । सूत्रमत्र व्यक्तं वर्तते ॥४३॥

[ द्रुतविलम्बितम् ]

नयति कस्तनयं नयवर्त्मना,
ननु कया तनया विनयाश्रिता ।
भवति किं च विकल्पकमव्ययं,
स्मरतु सूत्रममर्त्यगिराङ्कितम् ॥४४॥

( पञ्जिका )

(१) पुत्रं नीतिमार्गेण को नयति ? (२) पुत्री विनयकलिता कया किल क्रियते ? (३) विकल्पार्थकमव्ययं किं स्यात् ? संस्कृत-वागनुरूपं सूत्रं संस्मृत्य प्रतिवचनत्रयमाकलनीयम् ॥४४॥

[ शालिनी ]

वृद्धो यूना नैति तन्मात्रभेदे,
चार्थे द्वन्द्वः स्यान्न किं दुःसहोक्तौ ।
स्त्री पुंवच्च प्राप्नुयान्न प्रभुत्वं,
किं क्षेपे स्याद्धीनसत्त्वस्य हानिः ॥४५॥

( पञ्जिका )

वृद्धत्वमात्रविभेदे सति जराजर्जरितो वयस्थेन सह न संयाति, यद्वा वृद्धत्वमात्रान्तरे सति वृद्धो ना पुरुषः तरुणेन सहान्यप्रकारैरेति-सङ्घटते, समानशीलयोर्वृद्धवयस्थयोर्वृद्धत्वं न मैत्रीविघटकमितियावत् । अर्थे-धन-विषये दुःसहोक्तौ-कठोरवचने द्वन्द्वः-विरोधः सङ्गर. किं न स्यात् ? स्यादेव, अथवा अर्थे सति वैभवे विद्यमानेऽसह्यवचने केना-प्युक्ते सति तेन सह किं द्वन्द्वो न स्यात् ? स्यादेव । चार्थे इतरेतर-योगरूपार्थे-अर्थात्-परस्परमेकत्रीभूते जनसमूहे दुःसहोक्तौ द्वन्द्वः किं न स्यात् ? स्यादेव । पुरुषो यथा प्रभुत्वं-स्वामित्वं तीर्थपतित्वं वा प्राप्नु-

याव, तथा स्त्री न, स्वामी पुरुष एव भवति, अर्हन्नपि ना किल स्यात्। ननु स्त्री कदापि स्वामिपदं जिनपतिपदञ्च प्राप्तुमीशा । हीनसत्त्वस्य-क्लीबस्य क्षेपे तिरस्कारे विहिते सति किं हानिः स्यात् ? गौरवरहितस्य तस्य किं गौरवमपेयात् ? न किमपीति यावत् ॥४५॥

[ द्रुतविलम्बितम् ]

जगति को गतिसत्त्वबलाधिकः,
कुलमलङ्क्रियते विमलं कया ।
प्रतिवचोवचनं रचनोद्धुरं,
मधुरमर्थधुरंधरसूत्रतः ॥४६॥

( पञ्जिका )

(१) गमने सत्त्वगुणे वीर्ये चाधिकः कः स्याद्विश्वे ? (२) अमलं भवनं कुलञ्च कया विभूष्यते ? गुम्फोद्धतं प्रियं सदर्थावहमुत्तरवचनं सूत्रतो धर । यद्वा अर्थप्रकाण्डसूत्रात् प्रतिवचो वचनमाप्यमिति ॥४६॥

[ आर्या ]

कालमनन्तं भ्रान्तो, बन्धाद्दुरितस्य नित्यवैरस्य ।
आत्मन्ननन्तवीर्यं प्रयुज्य लघु नित्यवैरं स्य ॥४७॥

( पञ्जिका )

अयि आत्मन् ! त्वं तव सनातनवैरवतः कर्मणः पापस्य सम्बन्धात् अनन्तं कालं यावद् भ्रान्तोऽसि । अधुनाऽनन्तं सामर्थ्यमुप-युज्य त्वरितं नित्यवैरं विनाशय, निजैश्वर्यमधिगच्छेतियावत् । नित्य-वैरस्येति सूत्रं प्रस्तुतं प्रस्तुते, अनुस्वाराद्याधिक्यस्य यमके न दोषाव-हत्वमित्यवसेयम् ॥४७॥

[ वसन्ततिलका ]

कालेजतः शरदिजाज्ज्वरतो बिभीयाद्,
वर्षासुजो रटति प्रावृषिजाद्विकारात् ।

देवाः सदैव दिविजे ललिते रमन्ते,
प्रोक्तान्नसम्मितप्रयोगकृते यतन्ताम् ॥४८॥

( पञ्जिका )

समयसम्भवाच्छारदातापतोऽप्यवश्यं भयं विदध्यात् । यतो हि समुपेक्षितः स चिरकालं न स्पर्शति । भेकः प्रावृड्ऋतुसम्भवाद्विविध-विकारकारणात् ड्रौं ड्रौं इति शब्दायते । स्वर्लोके विविधरमणीयविलासे सर्वदा सुधान्धसो विलसन्ति । उक्तादत्रोक्त-कालेज-शरदिज-वर्षासुज-प्रावृषिज-दिविजात्मकप्रयोगपञ्चकसाधनार्थं यत्नो विधीयताम् । केन सूत्रेण प्रोक्तप्रयोगसिद्धिर्भवतीत्युच्यताम् ॥४८॥

[ मालिनी ]

रसरुधिरविमुक्तं भाति केषां शरीरं,
रसभरभरितः किं काव्यविज्ञाय पाठः ।
अभिमतमभिधानं धीविहीनस्य कीदृक्,
स्मरतु लघु तृतीयाध्यायपादं द्वितीयम् ॥४९॥

( पञ्जिका )

(१) रसरक्तादिधातुसप्तकरहितं शरीरं केषां राजते ? (२) साहित्य-मर्मवेदिने रसनिकरकरम्बितः पाठः किं स्यात् ? (३) मूर्खस्य तादृक् नाम किमस्ति यत्तस्मै अपि रोचते ? एतदर्थं हैमव्याकरणतृतीयाध्या-यस्य द्वितीयं पादं सत्वरं स्मरणपदवीमानीयताम् ॥४९॥

[ वसन्ततिलका ]

आद्यद्वयेन विषमो न भवेज्जगत्या—
मन्त्यद्वयेन वचनार्थवचो बहुत्वे ।
आद्यान्त्यवर्णवशतः कमलाकरः स्यात्,
सूत्रं किमत्र चतुरक्षरमक्षरज्ञ ? ॥५०॥

( पञ्जिका )

यत् सूत्रस्याद्याक्षरद्वयेन पृथिव्यां विषमार्थो न जायते, अन्तिमाक्षरयुगलेन वचनार्थकशब्दस्य प्रथमा बहुवचनरूपं भवति, आदिमान्तिमवर्णद्वययोगेन यद्भवति तेन कमलाकरस्तटाकोऽभिधीयते। तादृशं वर्णचतुष्टयात्मकं सूत्रं किमस्ति तत् अयि अक्षरविज्ञ—साक्षर! वदेति शेषः॥५०॥

[ पृथ्वी ]

यदीयपरमाक्षरो भवति वै विशेषार्थको,
द्वितीययुगलाक्षरे सति जयोऽथवा निश्चयः।
अनन्तिमपदे पुनः कलहकर्म नित्यं भवे—
त्तृतीययुगलादिवि स्थितिभृतोऽस्ति सूत्रं स्मर॥५१॥

( पञ्जिका )

यस्य सूत्रस्यादिमो वर्णो विशेषार्थद्योतको वर्तते। द्वितीययुगले गृहीते सति जयो निश्चयो वा भवति। अन्तिमवर्णमपहाय यत्पदं भवति तत्र सति सदैव कलहक्रिया भवति। तृतीययुग्मवर्णतो यत्पदं स्यात्तदमरवाचकं प्रथमाबहुवचनं विसर्गे सति स्यात्। एतदनुगमकं सूत्रं स्मृत्वा ब्रूहि॥५१॥

[ अनुष्टुप् ]

अस्ति सूत्रं नवं वाचि, प्राचि विप्रं विमाऽपते।
अचिरं तदरं ज्ञेयं, यदि व्याकरणं कृतम्॥५२॥

( पञ्जिका )

'व'विरहितं 'वाचि' सूत्रं वर्तते। 'प्र'त्यक्तं 'प्राचि'सूत्रं समस्ति। 'अचिरम्' रविधुरं सूत्रं भवति। यदि शब्दशास्त्रं हैमं दृढमभ्यस्तं तदाऽरं तत् सूत्रं वदेति॥५२॥

[ मन्दाक्रान्ता ]

क्रान्तोऽक्रान्तो नव इह नवः सद्विलोऽसद्विलोऽसौ,
क्षान्तः क्षान्तः स्वरसमरसोऽनृत् तथा सूनृतश्च ।
सूत्रव्यक्तीकरणकुशलो मानसे सन्निरूढः,
शब्दापःसंझरणशरणं सेव्यतां कल्पवृक्षः ॥५३॥

( पञ्जिका )

शब्दात्मकापःसंझरणनिकेतनं कल्पवृक्षः स्वाभिमतसूत्रप्रकटीकरण-निपुणो मानसे सन्निरूढोऽस्ति, स सेव्यताम्, सूत्रश्चाविष्क्रियताम् । कीदृशोऽयमास्ते ? कान्तोऽप्यकान्तः ककारविमुक्तः, दुःखविनाशकरणश्च । ववर्णविरहितस्तथाऽत्र प्रकरणे नवीनः । सद्विगतलकारः, अथ चाविद्यमानबिलः । क्षाक्षरविकलितः क्षमान्वितः, स्वरसतया रसोपेतः, ऋता मुक्तः, सत्यस्वरूपश्च आस्ते । कल्पवृक्षः उक्तविशेषणविलसितः सम्यग्विचारचर्चामापाद्यते तदा सूत्रं व्यक्तं भवेदेवेति सुनिश्चितम् ॥५३॥

[ अनुष्टुप् ]

क्रियाकलापदाही कः, कश्च विश्वासभञ्जन ।
देभुरित्यादि सिद्ध्यर्थं, सूत्रं किमुपयुज्यते ॥५४॥

( पञ्जिका )

सूत्रं यत्पदात्मकमास्ते तत्पदार्थः सः क्रियासमूहविनाशकः । अथ च प्रत्ययविघटको भवति । देभतुः, देभुरित्यादिरूपसिद्ध्यै सूत्रमिदं समुपयुज्यते । तद्धि किमस्ति ? उच्यतामिति ॥५४॥

[ उपजातिः ]

वदेत् स्वरः कां जननीं सुमेषोः, समुच्चयार्थे किमिहाव्ययं स्यात् ।
समूहवाची प्रकटः स्वरः कः, सूत्रं चतुर्थात् स्मृतिमानयन्तु ॥५५॥

( पञ्जिका )

(१) स्मरस्य सवित्री क एकः स्वरोऽभिदधाति ? (२) समुच्चयवाचकमव्ययं किमस्ति ? (३) समूहार्थः शब्दः कः प्रसिद्धः ? एतत्त्रयमेकीकृतं सत् यत् स्यात् तत् सूत्रमत्र । किं तत् ? चतुर्थाध्यायतः सूत्रमिदं स्मरणविषयमानयन्तु ।।५५।।

[ अनुष्टुप् ]

स्मृन्निषेधविधानार्थं, तुर्याध्यायव्यवस्थितम् ।
व्यञ्जनादिविसर्गान्त–सूत्रमत्र विचार्यताम् ।।५६।।

( पञ्जिका )

स्मृतां निषेधकार्यकरणाय चतुर्थाध्याये वर्तते सूत्रम्, व्यञ्जनशब्दादिमं विसर्गवरमञ्च तत् विचार्योच्यतामिति ।।५६।।

[ अनुष्टुप् ]

द्विजिह्वः सूत्रतां याया–द्द्वितीयो भवेद्यदि ।
द्वितीयत्वेऽक्षरः स्पष्टं, शब्दशास्त्रं विदाङ्कुरु ।।५७।।

( पञ्जिका )

'द्विजिह्वः' शब्दः सूत्ररूपेण परिणतो भवेद्यदि द्वितीयवर्णस्ततो विघट्यते, तत्स्थाने च 'त्वे' वर्णः स्थाप्यते । एवञ्च हैमशब्दानुशासनं स्पष्टमवबुध्यतामिति ।।५७।।

[ वसन्ततिलका ]

आद्यत्रयेऽन्तिमयुगे परिवर्तिते यत् ,
स्यात्तत्र पङ्कजजनिर्विशदा च राका ।
तुर्यद्वयं तु गमने यदि वा प्रयातौ,
नाद्यान्तिमा द्विलपमेति वदन्तु सूत्रम् ।।५८।।

( पञ्जिका )

अस्ति तादृशमेकं सूत्रं यदीयाद्याक्षरत्रयमादाय यत् स्यात् तत्रादि भिन्नवर्ण युगले स्थानपरिवर्तनं विधेयमेवञ्च सति यद् भवेत्तत्र कमलानां समुत्पत्तिर्भवति पूर्णिमा च चकास्ति । सूत्रस्य चतुर्थपञ्चमवर्णसङ्घटने यत् स्यात् तत् गमनवाचकशब्दसप्तम्येकवचने प्रसिद्धमथवा यातार्थक-पुँल्लिङ्गशब्दप्रथमाद्वितीयाद्विवचने व्यक्तम् । सूत्रस्थं चरमपदं चेत् 'ना'ऽनुगतं तदा ततो वस्तुमात्रं विध्वंसमायाति । एतत् सूत्रं किमिति विभाव्यम् ॥५८॥

[ द्रुतविलम्बितम् ]

नयनसायकरुद्रमितस्वरा, इदशकं नवकं पुनरस्य मुः ।
नुतियरा कटगं दधहं वङं, क्ङिति लुगं विदधाति वदन्तु तत् ॥५९॥

( पञ्जिका )

यत्र सूत्रे नयनमितः-द्वितीयः स्वरः आकारः, सायकाङ्कः-पञ्चम उकारः, रुद्रसङ्ख्यः एकादश एकारः, इति त्रयः स्वरा एकैकाः । इकारस्य दशकम् अस्य नवकम् मुः-मपञ्चकम्, नु-नपञ्चकम्, ति-तत्रयम्, य-यकारैकम्, रा-रद्वयम्, क-कैकम्, ट-टैकम्, ग-गैकम्, द-दैकम्, ध-धैकम्, ह-हैकम्, व-वैकम्, ङ-ङैकम् इति सर्वे वर्णाः सन्ति । अ९ आ-१, इ-१०, उ-१, ए-१, क-१ ग-१, ङ-१, ट-१, त-३, द-१, ध-१, न-५, म-५, य-१, र-२, व-१, ह-१ इत्येवं सर्वेऽष्टादश-विधा षट्चत्वारिंशन्मिता वर्णाः भवन्ति । सूत्रं च यत् कित्-ङित्-प्रत्यये परे लुकार्यं करोति । तत्सूत्रं किमस्ति तद्वदन्तु भवन्त इति ॥५९॥

[ अनुष्टुप् ]

स्मरारातौ स्मरे सव्ये, रम्ये स्तनप्रतीपयोः ।
कोशे नियोजयन् शब्दं, चित्रं सूत्रेऽन्यथाऽकृत ॥६०॥

( पञ्जिका )

अनेकार्थ संग्रहाभिधाने कोशे श्रीमद्भिर्हेमसूरीशैस्तादृश एकः शब्दो निरूपितोऽस्ति, यस्य स्मराराति:, स्मरः, सव्यः, रम्यः, स्तनः, प्रतीपम् इति षडर्था जायन्ते; परं व्याकरणे तैरेव सूरिवर्यैः स एव शब्दो भिन्नरूपेणोक्तार्थत्यागेनान्यार्थज्ञापकत्वेन नियोजितो वर्तते चित्रमेतत् । कः स शब्दः सूत्ररूपस्तद्विचार्योच्यतामिति ६०॥

[ हरिणी ]

प्रथममिह य–च्छब्दस्य स्या–त्पुलिङ्गजसन्तिमं,
द्वयमथधृतं तस्यैवैकं वचश्च तृतीयया ।
चरमयुगलं प्रान्तैकं वा विकल्पकमव्ययं,
वदतु विशदं सूत्रं विद्वन् ! प्रगृह्य चतुर्थतः ॥६१॥

( पञ्जिका )

(१) प्रकृतसूत्रस्याद्यावयवो यच्छब्दस्य पुंसि प्रथमाबहुवचनं भवति । (२) सूत्राद्याक्षरद्वयं चेदुपात्तं तदा यत्सत्कं तृतीयैकवचनं स्यात् । (३ चरमवर्णद्वयं सूत्रसत्कमन्त्यमेकमक्षरमथवा गृहीतं सद् विकल्पार्थावगमकमव्ययं भवेत् । चतुर्थाध्यायतो गृहीत्वा विशदं सूत्रं वदतात् अयि विद्वन् ! ॥६१॥

[ अनुष्टुप् ]

वर्गभिन्नाक्षरद्वन्द्व – मन्तस्थान्तमनादिमम् ।
ऊष्माक्षरादिमं धुर्यं, स्वरावौदात्र लक्ष्यताम् ॥६२॥

( पञ्जिका )

अस्ति सूत्रमेकमेतादृग् यत्र वर्गीयो नैकोऽपि वर्तते वर्णः। अथ च तद्वर्णद्वयविलसितम्, तत्रान्तो वर्णोऽन्तस्थातुर्य्यः । अथ च प्रथम

ऊष्माक्षराणां प्रथमः । तौ द्वावपि वर्णौ क्रमश औकाराकारस्वरसंवलितौ स्तः । सूत्रं लक्षितं भावीति ।।६२।।

[ शार्दूलविक्रीडितम् ]

स्याद्याद्याक्षरमुक्तमूर्ध्वगतिकं, प्राज्ञत्वसम्पादकं,
ज्ञात्यर्थादिगमं विमध्यमपदं, तमप्रत्ययान्तं मतम् ।
अन्त्येनाघटितं रवार्थवचनं, ङथन्तं श्रुतं लक्षणे,
चेत्तुर्य्यस्य तृतीयहैमचरणे, दक्षोऽसि तूर्णं वद ।।६३।।

( पञ्जिका )

तादृक् सूत्रं किम् ? यस्य प्रथमवर्णे त्यक्ते सति यद्भवति तदूर्ध्वगति चेत् प्रज्ञापरिवर्धकं स्यात् । मध्यमाक्षरविरहितं यत् पदं तत् ज्ञातिधनप्रमुखबोधकतस्प्रत्ययान्तरूपं सम्मतम् । चरमवर्णविघटितं यत् स्यात् तत् शब्दवाचकसप्तम्येकवचनङिप्रत्ययान्तं भवति । व्याकरणे वर्णमालायां च प्रसिद्धं तत् । चेत् श्रीसिद्धहेमचन्द्रशब्दानुशासनस्यकचतुर्थाध्यायतृतीयपादे कुशलोऽसि तदा शीघ्रं ब्रूहि ।।६३।।

[ उपजातिः ]

स्वादौ तुदादौ च चुरादिके यः, क्र्यादौ भवेद्धातुरिहाग्रिमः सः ।
वागर्थकाद्यैकवचो द्वितीय–स्ततोऽनुमुक्तोऽनुदितः किमस्ति।।६४।।

( पञ्जिका )

तादृशमत्रास्ति सूत्रं यदीयप्रथमो वर्णोऽस्ति धातुरूपः । स च धातुः स्वादिगणे, तुदादिगणे, चुरादिगणे, क्र्यादिगणे च वर्तते । द्वितीयवर्णो वाणीवाचकशब्दस्य प्रथमैकवचनरूपनिरूपित आस्ते । अत्र विसर्गो ज्ञेयः। सूत्रे विसर्गविरहो न दूषणम्, अपितु शब्दचित्रत्वाद्भूषणमेव । ततोऽनुरहितोऽनुदितः समस्ति । किमस्ति सूत्रमुच्यतामिति ।।६४।।

[ अनुष्टुप् ]

सूत्रमपादृतं पक्षौ, कवौ सूत्रमनादृतम् ।
कादि वावन्तिमं सूत्रं, त्रिप्रोक्तं किम बुध्यते ॥६५॥

( पञ्जिका )

पकारेण आदृतं न पक्षौ इति सूत्रम् । अकारेण नादृतं कवौ इति सूत्रम् । काद्यं वौ इत्यनाद्यं सूत्रम् । एवं त्रिवारमुक्तम् तथापि किं बुध्यते न वा ? बुध्यते चेद् किन्तद्वदेति ॥६५॥

[ उपजातिः ]

युद्धे महाभारतनाम्नि जाते, युधिष्ठिरं केऽनुसृता यविष्ठाः ।
सम्भाविते किं स्वजनेन पार्थे, शोकोऽनुयातो हरिणा हृतश्च ॥६६॥

( पञ्जिका )

(१) महाभारताभिधाने महासङ्करे सम्प्रवृत्ते धर्मराजं के लघु-भ्रातरोऽनुगता आसन् ? (२) अर्जुनं निजसम्बन्धिवर्गेण भीष्मद्रोणा-दिना किं कृते सति शोकः प्राप्त आसीत् ? गीतगीतेन कृष्णेन च स शोको दूरीकृतोऽभूत् ? अत्रोत्तरे यत्पदं तस्यापकृष्टपक्षाश्रयणरूपोऽर्थः संवेद्यः ॥६६॥

[ शार्दूलविक्रीडितम् ]

सङ्ख्याहः क्षणदाश्वकारदिवसौ, दोषा तथा भाः प्रभा,
कत्र्याद्यन्तलिविक्षपारजनयो, नान्दी दिनार्कविभाः ।
वित्रानन्तधनुर्दिवा बलिनिशा, जङ्घा च बाहुर्लिपि-
र्भक्तिः क्षेत्रमितीत्थमेकविकला, त्रिंशत्ततष्टः कृगः ॥६७॥

( पञ्जिका )

सङ्ख्यादय एकोनत्रिंशच्छब्दाः सन्ति, ततः कृग्धातोः टः प्रत्ययो

भवति । ते हि सर्वे शब्दा अत्र शार्दूलविक्रीडिते स्पष्टं विज्ञेया इति ॥६७॥

[ अनुष्टुप् ]

यस्मिन् सूत्रे सुराधीश-महाव्याधी निपातितौ ।
विराजतः सदा शुद्धौ, विद्वन्! तन्निपुणं स्मर ॥६८॥

( पञ्जिका )

सुरपति-महारोगौ यच्छब्दतो ज्ञायेते तौ द्वौ यस्मिन् सूत्रे निपातितौ सन्तौ सर्वदा शुद्धौ शोभेते, तत् सूत्रम् अयि साक्षर ! विशदं स्मरतात् ॥६८॥

[ वंशस्थम् ]

पुगे द्वितीयैकवचो वचोऽर्थकं, रवेः सुतः स्यात्प्रथमैकवाग्वृतः ।
मुनीश्वरा यत्र दधुमहामहं, त्रयं नियुज्य स्मर हैमलक्षणम् ॥६९॥

( पञ्जिका )

यत्र सूत्रे प्रथमं वाणीवाचकशब्दस्य द्वितीयाविभक्त्येकवचनरूपनिरूपितं पदं वर्तते । तत आदित्यात्मजाभिधायकः प्रथमैकवचनस्थितोऽस्ति । तत्परतो यदास्ते तत्र मुनिवराणां महोत्सवो जायते । एतत्त्रितयमेकत्र संयोज्यम् । एवञ्च हैमशब्दानुशासनस्य सूत्रं प्रकटं भावि । लघु स्मर्यतां किं तदिति ॥६९॥

[ अनुष्टुप् ]

अद्यान्वितं विधायैव – मनाममनरोभवम् ।
सूत्रं संसूत्रितं ज्ञेयं, 'कामं विद्यापरो भव' ॥७०॥

( पञ्जिका )

'कामं विद्यापरो भव' इति सूक्तपादः सूत्ररूपेण विधेयः । एतदर्थमेवं कर्तव्यम् उक्तपादं द्यान्वितमद्यान्वितं विदधातु । एवमुक्तः स

सामोऽस्ति सूत्रं त्वनामम् । स पुनररोभवान्वितः सूत्रमनरोभवम् । यद्‌वशिष्टं तद्धि सूत्रम् । किं तदुच्यतामिति ॥७०॥

[ शिखरिणी ]

अहंकारः कारागृहमगृहमार्यस्पृहितहृद्,
विलासः सन्त्रासः समसुखसमुल्लासदहनः ।
वपुः पुश्चौराणां गुणगणहराणामिति नवे,
क्षिणु क्षिप्रं क्षैवं सवितरि नमस्कार उदिते ॥७१॥

( पञ्जिका )

अहङ्कारः-अभिमानः धर्म्यसमीहाहरण, कुत्सितालयरूपं बन्धनागारं वर्तते । विषयविलासः प्रशमानन्दोत्साहभस्मीभूतकरणसन्त्रासोऽस्ति शरीरं गुणसमूहसम्पन्नाशकानां स्तेनानां नगरमास्ते । इतीत्थं संसारस्वरूपे दुरन्तापत्सम्पादके सति नूतने नमस्कारे पञ्चपरमेष्ठिनमस्कारात्मके आदित्ये उदयमाप्ते त्वमुन्मत्ततां सत्वरं दूरीकुरु । एवञ्च सामर्थ्ययोगान्निःश्रेयसमवाप्स्यसि । अस्याञ्च शिखरिण्यां प्रतिचरणप्रथमाक्षरसूक्तचरमाक्षरसङ्कलने हैमीयं सूत्रं प्रादुर्भवतीत्यनुसन्धेयम्। ७१॥

[ स्रग्धरा ]

असुधातोर्वर्तमानाऽन्यपुरुषबहुजं रूपमन्तर्नकारं,
स्यन्तं सच्छब्दजातं स्थिरमिह मतं पुंसि सद्रूपरूपम् ।
स्त्रीत्वे सम्बोधनान्तं प्रभवति च यतः सर्वक्रियाप्रत्ययाली,
साद्यत्यन्तं द्विवर्णं सुपदमनुपदं स्मर्यतां हैमसूत्रम् ॥७२॥

( पञ्जिका )

(१) द्व्यक्षरमास्ते सूत्रं तत्र मध्ये नकारे निहिते असूधातोर्वर्तमानायां तृतीयपुरुषबहुवचनरूपं भवति (२) एवमेव नमध्यं सच्छब्दस्य नपुंसकप्रथमाद्वितीयाबहुवचनं स्यात् । ( ३ ) नविरहितं सूत्रं यथावत्

सत्सत्कं पुँल्लिङ्गे सप्तम्येकवचनं भवेत् । (४) स्त्रीलिङ्गे तु सम्बोधनैकवचनं विज्ञेयम् । (५) सूत्रतोऽतः प्रत्यया वर्तमानाया भवन्ति धातोः । (६) सूत्रमिदं साद्यत्यन्तं चास्ते । सत्पदात्मकमेतत् त्वरया स्मर्यतामिति ॥७२॥

[ अनुष्टुप् ]

अभिन्ना न स्वरा यत्रा–न्तस्थान्त्यवर्गयुग्मकम् ।
व्यञ्जनानां चतुष्कं च, सूत्रं तत् स्मर सत्वरम् ॥७३॥

( पञ्जिका )

सूत्रमस्ति तादृशं यत्र चत्वारि व्यञ्जनानि सन्ति, तान्यपि तवर्गपवर्गान्तस्थासत्कानि नेतराणि ।अथ च अव्यतिरिक्तस्वरा न केऽपि, तत्सूत्रं संशोध्य स्मरतु भवान् इति ॥७३॥

[ शिखरिणी ]

पवर्गान्त्यं चाद्यं चरममिह तद्वर्गपरमं,
द्वितीयं तादीनां वलयघटकं मध्यमपरम् ।
असंयुक्तं सर्वं भवति न च यद्रम्यमसमं,
विसर्गान्त्यं सूत्रं वदतु विशदं लक्षणचण ! ॥७४॥

( पञ्जिका )

यत्सूत्रस्य प्रथमो वर्णः पवर्गस्य चरमोऽस्ति, चरमश्च वर्णः पवर्गस्य प्रथमो वर्तते । तादीनां वर्णानां द्वितीयो वर्णः सूत्रेऽप्यस्ति द्वितीयः अपरो मध्यो वर्णस्तृतीयो वलयमध्यो वर्तते । न कोऽपि वर्णो युक्तोऽत्रास्ते, सूत्रस्य युग्मभिन्नवर्णसमुद्भूतः शब्दः सुन्दरार्थो न भवति, अन्ते विसर्गोऽस्ति । किन्तत् सूत्रम् ? अयि व्याकरणपटो ! बटो ! विशदं वदतात् ॥७४॥

[ अनुष्टुप् ]

गत्वरः गत्वरं जीवो, गत्वरस्त्वरया मदः ।
गत्वरः श्रीमतामर्थो, 'गत्वरः' स्मर गत्वरे ॥७५॥

( पञ्जिका )

भवात्मा भवाद्भवान्तरे सत्वरं गमनशीलः, अहङ्कारो झगिति यायावरः, धनिनां धनं विनश्वरम्, गत्वरे प्रयोगे साधनीये 'गत्वरः' इति सूत्रमविस्मरणीयम् ॥७५॥

[ उपजातिः ]

गत्यर्थकादन्तिमधातुरूपं,
विध्यर्थमध्यैकवचो यदस्ति ।
ततो निरस्तो ननु वत्सरश्चेत्,
सन्धिं तदाधाय वदन्तु सूत्रम् ॥७६॥

( पञ्जिका )

आकारान्तगत्यर्थकधातोः सप्तमीमध्यमपुरुषैकवचने यद्रूपं भवेद् तत् प्रथमं विधेयम् । ततस्तकार–सकाराकाररहितवत्सरः स्थाप्यः सन्धि विधाय यद्भवेद् तत्सूत्रमस्ति प्रकृते । कीदृशं तद् ? वदताद्॥७६॥

[उपजातिः ]

स्त्रियां यदो यत् प्रथमाविभक्ते–रेकत्वरूपं प्रथमं द्विरुक्तम् ।
ततः समस्तो यदि संवरः स्यात्, सूत्रं समस्तं न तिरोहितं स्यात् ॥७७

( पञ्जिका )

यच्छब्दस्य स्त्रीलिङ्गे प्रथमैकवचने यद्रूपं तत प्रथमं द्विवारं वाच्यम्, ततः संविकलः संवरः स्थाप्यः तथा च प्रादुर्भवेद् यद् तद् सूत्रं व्यक्तमिह । अत्र सूक्ते संसारे या काचन स्त्री वर्तते तस्या सर्व–प्रकारेण संवरो यदि कृतः स्यात्तदा सर्वज्ञभगवदुक्तसूत्रवचनं तिरोहितं

न स्यात्, सार्वागमावगमाय स्त्रीपरित्यागो नितरामावश्यक इति यावत् ।'७७।।

[ वसन्ततिलका ]

माने गते प्रथमकाव्यरसो वियुक्तो,
माने चकासति सति स्फुरते पदार्थः ।
माने न गौरवमुपैति सदःसु विद्वान्,
माने द्विवर्णवचनात् प्रविधीयते घञ् ।७८।।

( पञ्जिका )

माने गर्वे दूरीभूते काव्यात्मनवरसमध्यस्थितः प्रथमः सम्भोग-शृङ्गाराख्यो रसो वर्ण्यते। यद्वा मानेऽभिमाने गते-स्थितिमाप्ते जने विप्रलम्भः शृङ्गारो निरूप्यते । प्रमाणे परिस्फुरति सति पदार्थः प्रकाशते । अहङ्कारे सति सभासु सुधीः सम्मानं न लभते । यद्वा सम्मानेन सुधीः सभासु गौरवं लभते । 'माने' इति सूत्रतो वर्णयुगलात्मतो 'घञ्' प्रत्ययो भवति ।।७८।।

[ अनुष्टुप् ]

'अनं' समर्पिते सूत्रे, जायते यत् प्रियं वचः ।
वसन्ते विपरीतं तद्, वर्षासु न विरुध्यते ।।७९।।

( पञ्जिका )

तादृशमेकं सूत्रं वर्तते यत्र 'अनम्' इति समर्पिते सति यद्वचनं भवति तत्र प्रियत्वेनानुभूयते । वसन्ततौ तत् 'वसन्ते भ्रमणं पथ्यम्' इतिवचनाद्विरुद्धं स्यात्। वर्षर्तौ तु 'वर्षासु च न गच्छति' इत्युक्तेर्न-प्रतिकूलं भवति । तत्र सूत्रं किम् ? तत् प्रोच्यताम् ।।७९।।

[ अनुष्टुप् ]

कारणं दुःखजातस्य, संसार एव कारणम् ।
कारणमिति सूत्रेण स्यात् कुम्भेऽनटि कारणम् ।।८०।।

( पञ्जिका )

कुत्सितरणरूपः संसारः खलु दुःखनिकरस्य निदानम् । कारण-मित्यात्मकसूत्रेण कृग्धातोरनटि प्रत्यये सति कारणमिति रूपं भवति ॥८०॥

[ अनुष्टुप् ]

नर्मदां बोधयेन्नाद्य-मनन्त्यं परमेऽर्थकम् ।
पादिरान्तं जसन्तं वा, ज्ञातं चेद्वद नोऽचिरम् ॥८१॥

( पञ्जिका )

(१) प्रथमवर्णविरहितं सूत्रं नर्मदानदीवाचकं भवति। (२) चरम-वर्णविमुक्तं तत् परमे इत्यर्थकं वर्तते । ( ३ ) पकारादिरकारान्तं यच्छब्दरूपं तच्चेज्जसप्रत्ययान्तरूपनिरूपितं सत् वान्तं सूत्रं भवति । चेद्विज्ञातं वदतादस्माकमचिरेणेति ॥८१॥

[ इन्द्रवज्रा ]

कुत्राचलं सत् चलपत्रपत्रं,
दृष्टे प्रिये कोऽभिरतो वियुक्तः,
धातोः कुतः सिध्यति सप्तमीष्टा ।
सूत्रं द्विवर्णं स्मर चित्रचित्रम् ॥८२॥

( पञ्जिका )

(१) चञ्चलं चलपत्रपादपपर्णं निश्चलं कस्मिन् विलोक्यते ? (२) विप्रयुक्तो जनः प्रियजने कुत्रावलोकिते सति स्यात् प्रीणितः ? (३) अभिमताः सप्तमीप्रत्यया धातोः कुतः सूत्रतः सम्भवन्ति ? वर्ण-युगलात्मकमाश्चर्यकरं सूत्रं स्मरतात् ॥८२॥

[ शालिनी ]

पारावारे ह्रस्वतामादिभागे, तार्तीयीकं ह्रस्वरूपं विदध्यात् ।
अध्यायेऽस्मिन् पञ्चमे सूत्रमुक्तं, तुर्ये पादे शोध्यतां बुध्यते चेत् ॥८३॥

( पञ्जिका )

'पारावारे' इत्येतस्मिन् आद्योपान्त्ययोर्ह्रस्वविधानाद् यद्भवेत् तत् सूत्रं व्याकरणेऽत्र पञ्चमाध्यायचतुर्थपादे कथितमस्ति चेत्त्वया ज्ञायते तत् शोध्यताम् ॥८३॥

[ प्रमाणिका ]

द्वितीययाऽद्वितीयया, गृहस्थकर्म सङ्गतम् ।
द्विरुक्तमत्र सूत्रवि-द्विविच्य सूत्रमुच्यताम् ॥८४॥

( पञ्जिका )

अनन्यया सहधर्मचारिण्या गार्हस्थ्यं समीचीनं भवति, तादृशार्थपरप्रथमाधसूक्ते सूत्रं द्विवारं कथितमस्ति : तत् सूत्रं किम् ? भोः सूत्रज्ञ ! विवेकं विधाय कथ्यताम् ॥८४॥

[ मन्दाक्रान्ता ]

अन्तस्थानां चरमपरमौ किं ङसि प्रत्ययान्तौ,
मिष्टः स्वानः प्रभवति कुतः स्त्री शिशूनां मनोहृत् ।
किं विध्यर्थेऽदनकरणतो वादिमं धातुरूपं,
सूत्रं सम्यक् स्मरणपदवीं स्थाप्यतामाप्यतां वा ॥८५॥

( पञ्जिका )

( ) अन्तिमप्रथमाक्षरावन्तस्थानां पञ्चम्येकवचनप्रत्ययान्तौ किम् ?
(२) अबलानां बालानाञ्च मनोहारी मधुरो निनादः कुतः प्रादुर्भवति ?
(३) भक्षणार्थकस्य धातोर्विध्यर्थतृतीयपुरुषैकवचनं वादिमं किम् ?
उक्तप्रश्नत्रयार्थं सूत्रं स्मरणविषयीक्रियतां सूत्रञ्च प्राप्यतामिति ॥८५॥

[ शार्दूलविक्रीडितम् ]

उच्चार्यात् किमु नामतो ङसिङसो रूपं पुरो वर्तते,
कस्मिन् कोमलता युतेऽपि पशवो यान्ति द्रुतं वश्यताम् ।

कः कालायसवाचकोऽक्षिरहितः, प्रान्ते पुना राजते,
सूत्रं तद्धितमत्र सत्वरमुपा–दत्तां विधत्तां हितम् ॥८६॥

( पञ्जिका )

(१) वृषभार्थकान्नाम्नः पञ्चमीषष्ठ्येकवचने यद्रूपं तत् प्रथमं किमास्ते। (२) ततः कुत्र कोमले सति पशवोऽपि वश्या भवन्ति त्वरितम्। (३) अन्ते पुनर्लोहार्थकः शब्दोऽविकलितः को विलसति। शीघ्रं तद्धित-प्रकरणस्थितं सूत्रमुपादत्तां हर्षञ्च विधत्तामिति ॥८६॥

[ इन्द्रवज्रा ]

अश्वस्य पत्न्या अनुरूपरूपो,
गोवाचको धुर्य्य उपात्त आस्ते।
ङ्यन्तं ततो नाम धुरन्धरार्थं,
वाच्यं प्रियं तद्धितवाचि सूत्रम् ॥८७॥

( पञ्जिका )

अश्वस्य सहधर्मिण्याः सदृशो वृषभाभिधायकः शब्दः सूत्रे प्रथम-मुपात्तो वर्तते। (२) ततः सप्तम्येकवचनरूपं धौरेयार्थकं नामास्ते। तद्धितवाचकमभिमतं सूत्रं प्रोच्यतामिति ॥८७॥

[ उपगीतिः ]

इभ्यसुतः श्रीमानपि रागान्नटसत्ककन्यायाः।
नृत्यति नटो नु वंशं रूढो रक्ते न किं भवति ॥८८॥
अस्मिन्नादिपाद–त्रयेऽनुसन्धीयतां सूत्रम्।

( पञ्जिका )

इलाचीतनयाभिधानः श्रेष्ठिसूनुर्धनवानपि नर्तकस्य तनयायाः प्रणयतो नर्तको भूत्वा वंशाग्रमधिरुह्य नृत्यं नृत्यति। रागासक्ते जने किं न सम्भवति? अपि सर्वं सम्भाव्यते। अस्यामुपगीतौ प्रथमं

चरणं परिहृत्य शेषपादत्रये तादृशं पदत्रयमास्ते यत संयोजनेन हैमीयं सूत्रमाविर्भवतीति ॥८८॥

[ उपजातिः ]

स्मरो व्यधायि स्मृतिमात्रशेषः,
स्यात् कालकूटाद् भववन्न मृत्युः ।
सूत्रं तवेष्टं यदि पञ्चवर्णं,
कूटं तदा द्राक् त्वयकाऽपमार्यम् ॥८९॥

( पञ्जिका )

चेत् त्वया मारो मरणं प्रापितस्तदा त्रिलोचनवत् हालाहलतोऽपि निधनं न भविष्यति । अत्र तव यदि हैमीयं सूत्रं पञ्चवर्णात्मकं प्रियं तदा 'कालकूटाद्भववत्' इत्यस्माद् झगिति कूटमपाक्रियताम्, एवञ्च सूत्रमभिव्यक्तं भविष्यत्येवेति ॥८९॥

[ शार्दूलविक्रीडितम् ]

यन्मूर्तिर्जनतामनोनयनहृत्, भल्लक्षणैर्लक्षिता,
यद्वाणी मधुरा सुधाधरकरी, स्पष्टा विशिष्टाक्षरा ।
यस्यास्ति प्रतिभा सदैव विशदा, सद्भावभावोद्भवा,
व्याख्याने न च तस्य किं ततयशोग्रन्थाद्भवेद्गौरवम् ॥९०॥

( पञ्जिका )

यस्याकृतिः प्रशस्तचिह्नचिह्निता सती जनसमूहान्तःकरणलोचन-हारिणी भवति । यस्य गीर्माधुर्यधुरीणा पीयूषापकर्षकारिणी विशदा उत्तमवर्णोऽविचला अस्ति । यस्य धीर्नित्यनिर्मला समीचीनभावप्रभाव-सम्पन्ना वर्तते तादृशस्य मुनीश्वरस्य प्रवचने विस्तृतयशःशास्त्रतो गौरवं किं न स्यात् ? अपि तु स्यादेव । अत्र 'तस्य व्याख्याने च ग्रन्थात्' इति व्याकरणसूत्रं संयोजितमास्ते ॥९०॥

[ आर्या ]

प्रभवति भवति वति पदं, कस्मान्नु मनुर्नभोऽङ्गिरः सूत्रात् ।
वति तसि य आमि किं वा, केन स्यात्तत्कृते यतताम् ॥९१॥

( पञ्जिका )

(१) वति प्रत्यये परे भवति सति मनुर्नभोऽङ्गिरइति त्रयं पद-संज्ञकं किं सूत्रतः खलु प्रभवति ? (२) वति प्रत्यये तसि प्रत्यये ये प्रत्यये आमि प्रत्यये च परे सति केन सूत्रेण का संज्ञा विधीयते ? ॥९१॥

[ भुजङ्गप्रयातम् ]

भवेद् युष्मदो ङे ङसा यत्स्वरूपं, पृथिव्यर्थवाच्येकवर्णो भवेद्यः ।
प्रभातार्थमन्यद्भवेद्यत् प्रसिद्धं, विलोमं तदा बुध्यतामत्र सूत्रम् ॥९२॥

( पञ्जिका )

युष्मच्छब्दस्य ङेप्रत्ययेन ङस्प्रत्ययेन च यद्रूपं स्यात् धरित्रीबोधक एकवर्णात्मको यः शब्दः प्रसिद्धः, प्रभातार्थमन्यद्यत् प्रसिद्धं नाम-तत्त्रयमेकत्रीकृत्य विलोमं च विधायात्र यदभिलषितं सूत्रमस्ति तदव-गम्यताम् ॥९२॥

[ उपजातिः ]

विप्रं भवेत् क्रोशचतुष्टयं यत्, नरं कजामन्त्रणमन्त्यमुक्तम् ।
प्रयोजनं चेत् तव सूत्रतस्तत्, सत्तद्धितं चेतसि चेतनीयम् ॥९३॥

( पञ्जिका )

तादृशमेकमास्ते सूत्रं यत् खलु प्ररहितं सत् क्रोशचतुष्टयाभिधायकं भवति । चरमवर्णवियुक्तं यदवशिष्टं तदपि रेफविरहितं सत् सरसी-रुहार्थकशब्दसम्बोधनं स्यात् । यदि तव तत्सूत्रतोऽस्ति प्रयोजनं तदा मनसि तद्धितप्रकरणं विचारणीयम् । तद्धितप्रकरणे सप्तमाध्यायेऽस्ति-तत्सूत्रम् ॥९३॥

[ अनुष्टुप् ]

रान्तं तद्युग्मितं सूत्र-मस्वरमवगम्यताम् ।
नान्ततन्त्रात्मकं तद्धि, नास्त्यत्र तत्र वर्तते ॥९४।

( पञ्जिका )

तद्द्वयविलसितं रेफान्तिमं स्वराकारेण कलितं सूत्रमवबुध्यताम्, तद्धि सूत्रमास्ते तन्त्ररूपं परं नान्तम्, अत्र नास्ति तत्र चास्ते, एतावता सूत्रगवेषणायासोऽपाकृत एव ॥९४॥

[ वसन्ततिलका ]

कस्मादृते पशुकुले शशकाः प्रसिद्धा,
वैशिष्ट्यमादधति भूमिधराश्च कस्मात् ।
कस्माद्धरेरजनि चापमतुल्यरूपं,
सूत्रादवैतु वचनं प्रतिपूर्वकं सत् ॥९५॥

( पञ्जिका )

(१) शशकाः पशुसमुदाये कस्माद्विरहिता विख्याता वर्तन्ते । (२) पर्वताः कुतो विशिष्टतां धारयन्ति ? (३) श्रीकृष्णस्यानुपमं धनुः कस्मात् प्रादुरभवत् ? । एतत् त्रितयप्रश्नोत्तरत्रिकमेकस्मादेव सूत्राज्जानातु । किं तत् सूत्रमुन्नीयतामिति ॥९५॥

[ अनुष्टुप् ]

कुत्र सूत्रे भवेद् वादौ, वाकूछुरामन्त्रणं भवेत् ।
ईहितं त्वरितं ब्रूयाः, शीलितं यदि तद्धितम् ॥९६॥

( पञ्जिका )

तादृशमेकं सूत्रं व्याकरणतः प्रकटीकार्यं यत्र सूत्रे वाकारे आदिभागे कृते-निहिते सति वागवीरार्थवाचकशब्दस्य सम्बोधनं स्यात् ।

तादृशं सूत्रं किमस्ति तत् तद्धितं यदि त्वया परिशीलितं तदाऽभीप्सितं सत्वरं वद ॥९६॥

[ शार्दूलविक्रीडितम् ]

आदेशो भवतीह ङेरभिमतः सर्वादितः पुंसि य-
स्तं नञ्वृत्तिवृतं विधाय विदितं सूत्रं समुन्नीयताम् ।
यद्वेदंनिनदो ङिना सह गतो यद्रूपरूपः स्थित-
स्तद्वै सूत्रमुदात्तचित्तविधृतं कृत्वा न विस्मर्यताम् ॥९७॥

( पञ्जिका )

(१) सप्तम्येकवचनस्य ङिप्रत्ययस्य सर्वादिशब्दतः पुंसि य आदेशो जायते तस्य खलु नञा समासं विधाय यत् स्यात्तदेवात्र विवक्षितं सूत्रमस्ति, विचार्यतां किमिति ? (२) अथवा इदंशब्दस्य ङिप्रत्यये यद्रूपं भवेत् तदेवात्र सूत्रम् तत्र सम्यग् मनसि धृत्वा नहि विस्मरणीयमिति ॥९७॥

[ द्रुतविलम्बितम् ]

षयुगले प्रथमं प्रथमस्वरं, परमतष्ठयुतं तत आस्वरः ।
तचरमश्च षडक्षरमत्र यद्, भवति सूत्रमिदं वद सूत्रविद् ॥९८॥

( पञ्जिका )

षयुग्मकं प्रथमं वर्तते, तत्र प्रथमं प्रथमस्वराकारेण परिणतमास्ते । द्वितीयं ठकारान्वितं वर्तते तत आकारोऽस्ति । अन्ते तु तकारो विलसति एवञ्च षड्वर्णात्मकं सूत्रं विविच्य वाच्यं सूत्रविदा त्वयेति॥९८॥

[ अनुष्टुप् ]

एकत्वे पञ्चमीषष्ठ्योः, ऋदन्तः किमु सोदरः ।
सप्तम्येकवचः स्तोत्रं, स्त्रीत्वे किं सूत्रमुच्चर ॥९९॥

( पञ्जिका )

(१) सहोदराभिधायकस्य ऋकारान्तस्य नाम्नः पञ्चम्येकवचने षष्ठ्येकवचने च किं रूपम् ? (२ स्तोत्रवाचकस्य शब्दस्य स्त्रीलिङ्गे सप्तम्येकवचने किं रूपम् ? सूत्रमनुसन्धाय त्तरमभिदधातु ॥९९॥

[ मालिनी ]

प्रथम-ककारमोऽस्तुः, द्राक् ततोऽस्यान्त इष्टो,
भव-नयनरकारः, सत्वरं ध्वंसमायात् ।
सलिलनिधिमकारः, कार्यतां दूरदूरं,
भवतु तदिह सूत्रं शर्मणे 'कर्मणी' ति ॥१००॥

( पञ्जिका )

'कर्मणि' इतिपदं सूत्ररूपेण विधातव्यमस्ति, तदर्थम् (१) प्रथम-ककारवर्णोऽपसारणीयः, (२) ततश्चाकाराक्षरस्य विध्वंसो विधेयः । (३) तदनु तृतीयो रकारस्त्वरितं विशकलीकार्य्यः । (४) चतुर्थो मकारोऽतिशयेन दूरं स्थाप्यः । एवञ्च यत् स्यात् तत् सूत्रमानन्दाय भवतु ॥१००॥

[ आर्या ]

सर्वस्यैको वर्णः, कदाचिदपि नैव जायते लोके ।
तस्मादनेकवर्णः, सर्वस्येत्थं कृतं सूत्रम् ॥१०१॥

( पञ्जिका )

जगति सन्ति लक्षशो मानवास्तेषां समेषां वर्ण एक एव न जातु जायते, अपितु ब्राह्मण-क्षत्रिय-वैश्य-शूद्रा इत्येवं नील: कृष्णः श्वेत इत्यादिर्वा पृथक् पृथक् वर्णो विद्यते । हैमव्याकरणे एतदर्थं यच्चकं सूत्रमधिकृतमास्ते, तद्धि'अनेकवर्णः सर्वस्ये'ति ॥१ १॥

[ मालिनी ]

सरसिजमधुमाद्यन्मञ्जुपुञ्जद्विरेफे,
सरसमरसि कूले गन्धवाहानुकूले ।

'मधुपकुलनिनादो नादवृन्दे वर'स्तदु-
युगपरमथ चान्त्यं कृष्यतामुच्यतां वा ॥१०२॥

( पञ्जिका )

कोकनदमरन्दमदकलकलरवकारिमधुकरे मन्दमन्दप्रवहमानमारुते सरोवरसमीपवर्तिनि तीरे भ्रमरनिकरगुञ्जारवः स्वनवृन्दवरः स्यात् । प्रकृतिप्रसन्ने तादृशे प्रदेशे मधुकरस्वन एव रोचते नान्य इति भावः । 'मधुपकुलनिनादो नादवृन्दे वरः' इत्युक्तवाक्यस्तृतीयश्चरमश्च वर्ण आकर्षणीयः, तथा च श्री सिद्धहेमचन्द्रशब्दानुशासनसत्कं सूत्रमाविर्भविष्यतीति ॥१०२॥

[ पुष्पिताग्रा ]

इह हि भवति कीदृशो विधाता,
कृतिकरणे समसाधनोऽस्तिवीर्य्यः ।
गुणगणकलिताय सूरिवर्य्यै-
र्झगिति किमु क्रियते वदन्तु सूत्रम् ॥१०३॥

( पञ्जिका )

(१) विश्वे [ खलु ] सम्पूर्णसाधनसामग्रीसमन्वितो वीर्य्यवान् विधाता कार्य्यविधाने कीदृशो भवेत् ? (२) गुणनिकुरम्बकरम्बिताय शब्दाय शिष्याय वा सूरिवर्य्यैः-पण्डितैराचार्यैश्च किमचिराय विधीयते ? विचार्य्य सूत्रमुपादीयतामिति ॥१०३॥

[ स्रग्धरा ]

सम्प्राप्यांशं कृपाया अनुपममहसां नेमिसूरीश्वराणां,
श्रीहैमं शब्दशास्त्रं रमयितुमुचितोऽरम्भि यश्चित्रबन्धः ।
आचार्याणां प्रसादा-दमृतपदभृतां पुण्यनाम्नां च सोऽयं,
सिद्धो धौरन्धरोऽस्मिन् जगति विजयतां लक्षणाद्यो विलासः ॥१०४॥

( पञ्जिका )

अद्वितीयतेजश्चण्डीकृततीव्ररुचां तपागच्छाधिपतीनां सर्वतन्त्रस्वतन्त्राणां सूरिचक्रचक्रवर्तिनां तीर्थोद्धारकरणैकनिष्णातानां समाराधितपञ्चप्रस्थानमयसूरिमन्त्राणां जगद्गुरूणां बालब्रह्मचारिणां श्रीमतां भट्टारकाचार्यमहाराजाधिराजश्रीविजयनेमिसूरीश्वरमहाराजानामनुकम्पाया लेशमवाप्य श्रीसिद्धहेमचन्द्रशब्दानुशासनमभिरमयितुं चित्रबन्धात्मकःखण्डकाव्यग्रन्थो यः समारब्धः स खल्वयं लक्षणविलासाख्यः शास्त्रविशारद-कविरत्न-पीयूषपाणि-परमप्रभावक-पूज्यपादाचार्यवर्यश्रीविजयामृतसूरीश्वरमहाराजानां वयोवृद्ध-विनयनिधान-पन्न्यासप्रवरश्रीपुण्यविजयजिद्गणिवर्याभिधानानाञ्च गुरूणामनुभावात् पूर्णतां प्राप्तः । अत्र विश्वे सर्वोत्कर्षेण वर्ततामिति ॥१०४॥

[ अनुष्टुप् ]

अब्धि४-चन्द्र१-नभो०-नेत्र२-मिते वैक्रमवत्सरे ।
मधौ सित-नवम्यार्कि-वारेऽयं सिद्धिमागमत् ॥१०५॥

( पञ्जिका )

श्रीविक्रमार्कसंवच्चतुर्दशाधिकसहस्रद्वये चैत्रे मासि सिते पक्षे नवम्यां तिथौ शनैश्चरवासरे अयं ग्रन्थः पूर्णोऽभवत् ॥१०५॥

श्रीलक्षणविलासस्य स्वोपज्ञस्य कनीयसी ।
विहिताऽभ्यर्हिता जीयात् पञ्जिकाऽर्थमहीयसी ॥

卐

## लक्षणविलासे नियोजितानां

# सूत्राणां सूचिः


अचि ।।३।।४।।१५।।

अणि ।७।४।५२।

अधातुविभक्तिवाक्यमर्थवन्नाम ।१।१।२७।

अनट् ।५।३।१२४।

अनवर्णा नामी ।१।१ ६।

अनेकवर्णः सर्वस्य ।७।४।१०७।

अपः ।१।४।८८।

अपायेऽवधिरपादानम् ।२।२।२९।

अमा त्वा मा ।२।१।२४।

अर्हं ।१।१।१।

अविवक्षिते ।५।२।१४।

अस्मिन् ।७।३।२।

इन्द्रे ।१।२।३०।

ई च गणः ।४।१।६७।

उपसर्गाद् दिवः ।२।२।१७।

एः ।१।४।७७।

कर्तुर्व्याप्यं कर्म ।२।२।३।

कर्मणि ।२।२।४०।

कारणम् ।५।३।१२७।

कालः ।३।१।६०।

कालाद्भववत् ।६।२।१११।

कालेभान्नवाधारे ।२।२।४८।

किं क्षेपे ।३।१।११ ।

कुमारः श्रमणादिना ।३।१।११५।

क्रियाविशेषणात् ।२।२।४१।

क्रियाहेतुः कारकम् ।२।२।१।

क्विप् ।५।१।१४८।

क्नौ ।४।४।११९।

गत्वरः ।५।२।७८।

गोः स्वरे य. ।६।१।२७।

ग्मिन् ।७।२।२५।

चार्थे द्वन्द्वः सहोक्तौ ।३।१।११७।

चित्रे ।५।४।१९।

तत्र ।५।१।५३।

तं भाविभूते ।६।४।१०६।

तस्य व्याख्याने च ग्रन्थात् ।६।३।१४२।

थोन्थ् ।१।४।७८।

दम्भः ।४।१।२८।

देवानांप्रियः ।३।२।३४।

द्युप्रावृड्वर्षाशरत्कालात् ।३।२।२७।

द्वितीयया ।५।४।७८।
द्वित्वे ह्वः ।४।१।८७।
धूगौदित: ।४।४।३८।
न ।२।२।१८।
नवास्वरे ।२।३।१०२।
नशः शः ।२।३।७८।
नशाद् ।१।३।६२।
नाथः ।२।२।१०।
नाम्नि ।२।४।१२।
नित्यवरस्य ।३।१।१४१।
पदान्ते ।२।१।६४।
परः ।७।४।११८।
परावरे ।५।४।४५।
परे वा ।५।४।८।
पितामात्रा वा ।३।१।१२२।
पुच्छाद् ।२।४।४१।
पुरन्दरभगन्दरौ ।५।१।११४।
पुरुषः स्त्रिया ।३।१।१२६।
पुरोऽस्तमव्ययम् ।३।१।७।
प्रभवति ६।३।१५७।
प्रयोजनम् ।६।४।११७।
भीमादयोऽपादाने ।५।१।१४।
भ्रातुः स्तुतौ ।७।३।१७९।
मथलपः ।५।२।५३।
मनः ।२।४।१४।
मनयवलपरे हे ।१।३।१५।
मनुर्नभोऽङ्गिरो वति ।१।१।२४।
माने ।५।३।८१।
यमिरमिनमिगमिहनिमनिव-
नतितनादेर्धुटि क्ङिति ।४।२।५५।
यायावरः ।५।२।८२।
येन वा ।४।२।६२।
रषृवर्णान्नो ण एकपदेऽनन्त्यस्या-
लचटतवर्गशसान्तरे ।२।३।६३।
रागाट्टो रक्ते ।६।२।१
लोकात् १।१।३
वत्तस्याम् १।१।३४।
वाः शेषे १।४।८२।
वाचंयमो व्रते ५।१।११५।
वाडवेयो वृषे ६।१।८५।
वाद्यात् ६।१।११।
वामः ४।२।५७
विवादे वा ३।३।८०
वृद्धो यूना तन्मात्रभेदे ३।१।१२४।
व्यः ४।१।७७
शदिरगतौ शात् ४.२।२३।
श्रृङ्गात् ७।२।१२।
शेषे लुक् २।१।८
शौ वा ४।२।९५।
षष्ठात् ७।३।२५।
सङ्ख्याहर्दिवाविभानिशाप्रभा-
भाश्चित्रकर्त्राद्यन्तानन्तकारबाह्व-

हृधनुर्नन्दीलिपिपलिविबलि-
भक्तक्षेत्रजङ्घाक्षपाक्षणद्वारजनि
दोषादिनदिवसाट्टः [illegible]।१।१०[illegible]।
संयोगात् २।१।५२।
सति ५।२।१९।
समर्थः परविधिः ७।४।१२२।
समानानां तेन दीर्घः १।२।१।
समीपे ३।१।३५
समो गिरः ३।३।६६।
सम्राट् १।३।१६।
सिद्धिः स्याद्वादात् १।१।२।
स्त्रियाम् १।४।९३।
स्त्रीदूतः १।४।२९
स्त्रीपुंवच्च ३।१।१२५।
स्वतन्त्रः कर्ता २।२।[illegible]।
स्वरेऽतः ४।३।७५
ह्रस्वस्य १।४।४१

लक्षणविलाससूक्तानाम्

# अकारादिक्रमः


| | | | |
|---|---|---|---|
| अद्या | ७० | कस्मादृते | ९५ |
| अनं | ७९ | कान्तो | ५३ |
| अनले | २७ | कामः | १७ |
| अन्तस्था | १५ | कारणं | ८० |
| अन्तस्थाना | ८५ | कालमनन्तं | ४७ |
| अपाये | २८ | कालेजतः | ४८ |
| अब्धि | १०५ | कीदृग् | २३ |
| अभिन्ना | ७३ | कुत्रसूत्रे | ९६ |
| अयोगानां | ३ | कुत्रा | ८२ |
| अर्हं | १ | कुर्युर्विम | ३५ |
| अश्वस्य | ८७ | केना | २९ |
| अस्ति | ५२ | क्रिया | ५४ |
| असधातोः | ७२ | गत्यर्थ | ७६ |
| अहंकारः | ७१ | गत्वरः | ७५ |
| आदेशो | ९७ | जगति को | ४६ |
| आद्यः | ४१ | तवर्गा | ३२ |
| आद्यत्रये | ५८ | द्विजिह्वः | ५७ |
| आद्यद्वयेन | ५१ | द्वितीयया | ८४ |
| इभ्यसुतः | ८८ | धातोरर्थः | ३० |
| इहहि | १०३ | धातोरर्थे | २६ |
| उक्षार्थात् | ८६ | मयति | ४४ |
| एकत्वे | ९९ | नयन | ४९ |

| | |
|---|---|
| नर्मदां | ८१ |
| निःशेषे | १८ |
| नैयायिकैः | ३६ |
| पदं | २१ |
| पवर्गाद्यं | ९ |
| पवर्गान्त्यं | ७४ |
| पारावारे | ८३ |
| पाल्यते | ४३ |
| पुरो | ६९ |
| प्रथमं | १६ |
| प्रथमकवि | १०० |
| प्रथममिह | ६१ |
| प्रभवति | ९१ |
| प्रातःकाले | ३८ |
| प्रादु | २४ |
| भवति किं | १९ |
| भवति कुत्र | ३४ |
| भवतिगति | २५ |
| भवेत् | ९२ |
| भव्या | २० |
| माने | ७८ |
| मो व्यञ्जने | १० |
| यत् पूज्यं | २ |
| यदीय | ५१ |
| यन्मूर्तिः | ९० |
| यस्मिन् | ६८ |
| युक्ते | १३ |
| युद्धे | ६६ |
| य्वृन्नि | ५६ |
| रसरुधिर | ४९ |
| राजते | ४० |
| रान्तं | ९४ |
| रूपं | ५ |
| वदेत् | ५५ |
| वर्ग | ६२ |
| विक्षेपे | ४२ |
| विना ज्ञानं | २२ |
| विना विना | ३३ |
| विप्रं | ९३ |
| वृद्धो | ४५ |
| व्याकरणं | ४ |
| शरीरं | ६ |
| शस्त्रं | ११ |
| श्याम | ३१ |
| षयुगले | ९८ |
| संसार | १२ |
| सङ्ख्या | ६७ |
| सन्ध्य | १४ |
| समानानां | ७ |
| समीपे | ३९ |
| सम्प्राप्यांशं | १०४ |
| सरसिज | १०२ |

| | |
|---|---|
| सर्वस्यै | १०१ |
| सुरेशस्त्वं | ८ |
| सूत्र | ६५ |
| स्मरारातौ | ६० |
| स्मरो | ८९ |
| स्याद्वा | ६३ |
| स्याद्वान | ३७ |
| स्वादौ | ६४ |
| स्त्रियां | ७७ |

लक्षणविलास-सत्कसूक्तानां

## - वृत्तानि -

(१) अष्टाक्षरमनुष्टुब्वृत्तम्, तल्लक्षणमेवम्—

"पञ्चमं लघु सर्वत्र, सप्तमं द्विचतुर्थयोः ।
गुरु षष्ठं विजानीयात्, शेषेष्वनियमो मतः ॥"

प्रकृते—१, ८, १०, ११, १५, १७, १८, २०, २४, २७, ३१, ३५, ३६, ३९, ४०, ४१, ४२, ४३, ५२, ५४, ५६, ५७, ६०, ६२, ६५, ६८, ७०, ७३, ७५, ७९, ८०, ८१, ९४, ९६, ९९, १०५, इत्यङ्का षट्त्रिंशत्-श्लोका अनुष्टुब्वृत्तविलसिताः ।

(२) प्रमाणिकावृत्तमष्टाक्षरम् । तल्लक्षणन्तु—

"प्रमाणिका जरौ लगौ" । इति ।

| जगणः, | रगणः, | लघुः, | गुरुः, | |
|---|---|---|---|---|
| ।ऽ। | ऽ।ऽ | । | ऽ | —इति स्थापना । |

८४ मिते सूक्ते वृत्तमिदं विलसति ग्रन्थेऽत्र ।

(३-४) आर्या उपगीतिश्च मात्रावृत्ते तयोर्लक्षणे चेत्थम्—

"यस्याः पादे प्रथमे, द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये, चतुर्थके पञ्चदश साऽऽर्या ॥"

प्रस्तुतग्रन्थे ४, ४७, ९१, १०१ सङ्ख्यकाश्चत्वारः श्लोका आर्या-वृत्तविशिष्टाः ।

"आर्या अपरार्धसमं यत्पूर्वार्धमुपगीतिः सा" ॥

उपगीतिवृत्तमत्र ८८ तमे सूक्ते वर्तते ।

(५) सुन्दरीनामार्धविषमवृत्तमेतल्लक्षणं यथा—

"अयुजोर्यदि सौ जगौ युजोः,
सभरा्ल्लगौ यदि सुन्दरी तदा ॥"

स्थापना—

| | | | | | |
|---|---|---|---|---|---|
| सगणः, | सगणः | जगणः, | गुरुः | | } १–३ |
| ।।ऽ, | ।।ऽ, | ।ऽ। | ऽ | | } पादयोः |
| सगणः, | भगणः, | रगणः, | लघुः, | गुरुः | } २–४ |
| ।।ऽ, | ऽ।।, | ऽ।ऽ, | । | ऽ | } पादयोः |

अत्र षोडशं सूक्तं सुन्दरीवृत्तघटितम् ।

वैतालीयम् वियोगिनी इत्यस्या एव नामान्तरम् ।

(६–७) एकादशाक्षरे इन्द्रवज्रोपजाती वृत्ते—

'स्यादिन्द्रवज्रा यदि तौ जगौ गः ।"

इतीन्द्रवज्रालक्षणम् ।

स्थापना—

तगणः, तगणः जगणः, गुरुः, गुरुः

SSI, SSI, ISI S S

अत्र—१२, १३, ८२, ८७, इति सङ्ख्यकाश्चत्वारः श्लोका इन्द्रवज्रावृत्ते ।

इन्द्रवज्रोपेन्द्रवज्रयोः पादौ मिलितौ तदा उपजातिः, उपेन्द्रवज्राऽपीन्द्रवज्रा समैव केवलमिन्द्रवज्रायामाद्यो वर्णो गुरुर्भवति, उपेन्द्रवज्रायान्तु लघुः ।

अत्र—१४, ३३, ५५, ६४, ६६, ७६, ७७, ८९, ९३, इत्यङ्का नवश्लोका उपजातिप्रथिताः ।

(८) शालिनीवृत्तमेकादशाक्षरम्, लक्षणं तदीयमेवम्—

"शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ।"

स्थापना—

मगणः, तगणः, तगणः, गुरुः, गुरुः

SSS SSI SSI S S

अत्र शालिनीवृत्ते २६, ३०, ४५, ८३, इति चत्वारः श्लोकाः सन्ति ।

(९) द्वादशाक्षरं वंशस्थं वृत्तम्, तल्लक्षणञ्चैवम्—

"जतौ तु वंशस्थमुदीरितं जरौ ।"

स्थापना—

जगणः, तगणः, जगणः, रगणः

ISI SSI ISI SIS

६९ तमः श्लोको ग्रन्थेऽत्र वंशस्थवृत्ते वर्तते ।

(१०) भुजङ्गप्रयातं द्वादशाक्षरं वृत्तम् । तल्लक्षणन्तु—

"भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः" इति ।

स्थापना—

| | | | |
|---|---|---|---|
| यगणः, | यगणः, | यगणः, | यगणः |
| ।ऽऽ, | ।ऽऽ, | ।ऽऽ, | ।ऽऽ |

२१, ९२, इतिसङ्ख्यके द्वे सूक्ते वृत्तेऽत्र वर्तेते ।

(११) द्वादशाक्षरं वृत्तं द्रुतविलम्बितम्, लक्षणमेवमेतस्य—

"द्रुतविलम्बितमाह नभौ भरौ ।" इति ।

स्थापना—

| | | | |
|---|---|---|---|
| नगणः, | भगणः, | भगणः, | रगणः, |
| ।।।, | ऽ।।, | ऽ।।, | ऽ।ऽ |

अत्र १९, ३४, ४४, ४६, ५९, ९८ मिताः षट् श्लोका वृत्तेऽत्र ।

(१२) पुष्पिताग्रावृत्तमर्धविषमम् । तल्लक्षणं यथा—

"अयुजि नयुगरेफतो यकारो, युजि तु नजौ जरगाश्च पुष्पिताग्रा ।"

स्थापना—

| | | | | | |
|---|---|---|---|---|---|
| नगणः, | नगणः, | रगणः, | यगणः | | १-३-पादयोः |
| ।।।, | ।।।, | ऽ।ऽ, | ।ऽऽ | | |
| नगणः, | जगणः, | जगणः, | रगणः, | गुरुः | २-४ पादयोः, |
| ।।।, | ।ऽ।, | ।ऽ।, | ऽ।ऽ, | ऽ | |

१०३ तमं सूक्तमत्रग्रन्थे पुष्पिताग्रावृत्तललितमास्ते ।

(१३) चतुर्दशाक्षरवृत्तं वसन्ततिलका, तल्लक्षणमेवम्--

"उक्ता वसन्ततिलका तभजा जगौ गः ।"

स्थापना—

तगणः, भगणः, जगणः, जगणः, गुरुः; गुरुः
ऽऽ।, ऽ।।, ।ऽ।, ।ऽ।, ऽ, ऽ

प्रकृते २३-३७-४८-५०-५८-७८-९५ इति सप्तश्लोकानां वृत्तं वसन्ततिलका ।

(१४) पञ्चदशाक्षरवृत्तं मालिनी । तल्लक्षणं त्वेवम्—

"ननमयययुतेयं मालिनी भोगिलोकैः ।"

स्थापना—

नगणः, नगणः, मगणः, यगणः, यगणः
।।।, ।।।, ऽऽऽ, ।ऽऽ, ।ऽऽ

अष्टभिः सप्तभिश्च विरतिरत्र ।

अत्र २५-४५-१८०-१८२ इति चत्वारः श्लोका मालिनीवृत्त-विलसिताः सन्ति ।

(१५) सप्तदशाक्षरवृत्तं मन्दाक्रान्ता, पृथ्वी, हरिणी, शिखरिणी च ।

तत्र मन्दाक्रान्तालक्षणं चैवम्—

"मन्दाक्रान्ताऽम्बुधिरसनगैर्मोभनौ गौ यथुग्मम् ।"

स्थापना—

मगणः, भगणः, नगणः, गुरुः, गुरुः, यगणः, यगणः
SSS, SII, III, S, S, ISS, ISS

चतुर्भिः, षड्भिः, सप्तभिश्च विरतिः ।

अत्र ३८–५६–८५ इति त्रयः श्लोका मन्दाक्रान्तामण्डिताः ।

(१६) पृथ्वीवृत्तलक्षणं यथा—

"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।"

स्थापना—

जगणः, सगणः, जगणः, सगणः, यगणः, लघुः, गुरुः
ISI, IIS, ISI, IIS, ISS, I, S

अष्टभिर्नवभिश्च विरामः ।

प्रकृते ५१ तमे सूक्ते पृथ्वीवृत्तं विराजते ।

(१७) हरिणीवृत्तलक्षणं त्वेवम्—

"रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणा तदा ।"

स्थापना—

नगणः, सगणः, मगणः, रगणः, सगणः, लघुः, गुरुः
III, IIS, SSS, SIS, IIS, I, S

षड्भिः, चतुर्भिः, सप्तभिश्च विरतिः ।

अत्र ६१ तमं सूक्तं हरिणीवृत्तालङ्कृतं वर्तते ।

(१८) शिखरिणीवृत्तलक्षणं यथा—

"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।"

स्थापना—

यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुः,
। S S, S S S, । । ।, । । S, S । ।, ।, S,

षड्भिःरेकादशभिश्च विरतिः ।

प्रस्तुते ३, ६, ७, ९, २२, २८, ३२, ७१, ७४, इत्यङ्काङ्कितं सूक्तनवकं शिखरिणीवृत्तविभूषितमास्ते ।

(१९) एकोनविंशत्यक्षरं शार्दूलविक्रीडितं वृत्तम् । लक्षणमस्यैवम्—

"सूर्याश्वैर्मसजस्तताः सगुरवः; शार्दूलविक्रीडितम् ।"

स्थापना—

मगणः, सगणः, जगणः, सगणः, तगणः, तगणः, गुरुः
S S S, । । S, । S ।, । । S, S S ।, S S ।, S

द्वादशभिः सप्तभिश्च विरामः ।

ग्रन्थेऽत्र २, ५, २९, ६३, ६७, ८६ ९०, ९७, इत्यष्टौ श्लोका शार्दूलविक्रीडितमण्डिताः ।

(२०) एकविंशत्यक्षरं वृत्तं स्रग्धरा । तल्लक्षणं यथा—

"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।"

स्थापना—

मगणः, रगणः, भगणः, नगणः, यगणः, यगणः, यगणः
S S S, S । S, S । ।, । । ।, । S S । S S, । S S

सप्तभिः सप्तभिः सप्तभिश्च विरतिः ।

अत्र लक्षणविलासे स्रग्धरावृत्तविलसिते ७२, १०४ तमे सूक्ते विलसत इति ।

★

"કોઈકને એમ લાગે કે આ યુગમાં વ્યાકરણને આટલું બધું મહત્વ શા માટે? પરંતુ આ પ્રશ્ન જ નિરર્થક છે. કોઈપણ યુગને વ્યાકરણ વગર ચાલ્યું નથી. અને ભવિષ્યના કોઈ યુગને પણ વ્યાકરણ વગર નહીં ચાલે. વ્યાકરણની ઉપેક્ષા થતાં સાહિત્યની ઉપેક્ષા થશે અને સાહિત્યની ઉપેક્ષા થાય ત્યાં જીવનની દશા પણ દયાપાત્ર બની જાય છે એટલે આપણા વિદ્યાર્થીઓ અને અન્ય અભ્યાસીઓ ભાષા અને વ્યાકરણના અભ્યાસમાં વિશેષ રત થાય એ જરૂરનું છે. અને આ દિશામાં લક્ષણવિલાસ સહાયરૂપ બનશે. એ અવશ્ય."

(બાદરાયણ)

*

"Here is now before us this लक्षणविलासः confronting us with a challenge to tackle over a hundred such Prahelikas. The moment you take up the gauntlet you find yourselves overwhelmed and deeply engrossed in a composite task, namely that of getting at the purport of the verse before you and also that of laying your finger on the right Sutra. Verse follows verse and drags you on and on until you have solved all the riddles, unless you are compelled by some other urgent matter to lay the self-imposed ordeal aside. No, in fact this is not an ordeal; it is a pursuit that grips you. The test is severe, but you enjoy it while it lasts, and you eagerly submit to it when the interruption is away."

Ramprasad P. Bakshi.